द्वितीय ८२

1

ॐ नमो भगवते वासुदेवाय श्रीकृष्णपरमात्मने नमः। ॐ द्वितीये तु दशाध्याये श्रीभागवतमादितः। उद्देशलक्षणाभ्यां संक्षिप्य मानतोऽपवर्ण्यते॥ तत्र प्रथमेऽध्याये कीर्तनश्रवणादिभिः। प्रविष्टे भगवद्रूपे मनसो धारणोच्यते॥ यत्र सुकीर्तनदानेन तपोयोगादि सत्फलं। तं नित्यपरमानन्दं हृषीकेशं सनातनं॥ अथ द्वितीयस्कन्धव्याख्या। उक्ताः पूर्वानुयोऽहीते। सप्तसर्गः श्रुकाराम। राजप्रश्नात्तृणां कृत्यमथाह शुकसन्मतिः। राजप्रश्नमभिनन्दति वरीयानिति तेनयात्रुमो श्रोतव्यादिषु मध्ये यः परः। श्रेष्ठः गोचरः प्रश्नः कृतः एष वरीयान्। यतो लोकहितमतोऽयमात्महेतुत्वात् आत्मविदां सन्नानां च संमतोऽयं। तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन् इह ह्रियतां विपर्य-

श्रीभगवानुवाच। वरीयानेष ते प्रश्नः कृतो लोकहितं नृप। आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः॥ १
श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः। अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनां॥ २ निद्रया ह्रियते नक्तं
व्यवायेन च वा वयः। दिवा चार्थेहया राजन् कुटुंबभरणेन वा॥ ३ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्व-
पि। तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति॥ ४ तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः। श्रोतव्यः की-

यमित्यस्योत्तरमाह श्रोतव्यादीनि सप्तभिः। गृहेषु सक्तानामत एव गृहमेधिनां तत्र पंच महापापाणि मेधति हिंसार्थः। ते च वयस्य वायुषो व्ययो भवतीत्याह नक्तं रात्रौ वयः आयुः निद्रया व्यवायेन रत्या वा ह्रियते दिवा चार्थेहया अर्थार्थचेष्टया कुटुंबपोषणेन वा। चकारा वकारसमुच्चयार्थौ अपि निवृत्तस्य वाधिकाराभिताश्चान्ये वा एवं जनयन्प्रश्नैकदेशस्योत्तरमाह २ ननु तत्र कृत्वेत्यापदैकदेशमग्निप्रकृत्या ते तत्राह देहादिषु आत्मनः सैन्येषु परिकरेषु असत्स्वपि नश्वरेष्वपि प्रमत्तः तेषां पित्रादीनां दृष्ट्वा नेतनं नाशं पश्यन्नपि नाशं न पश्यति ४ एवं विपर्ययप्रश्नस्योत्तरमुक्ता श्रोतव्यादिप्रश्नस्योत्तरमाह तस्मादिति ह भारत सर्वात्मा।

निबोद्धव्यमाह भगवानिति सोऽस्मीत्यादि ... श्रोतव्यमित्यादि ... मोक्षमिच्छता ५ ॥

खट्वांगो हि देवपक्षे स्थित्वा दैत्यान् जयन् ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तो तेनोक्तं प्रथमं तावन्ममायुः
कथ्यतामिति ततो देवैरुक्तं तव मुहूर्तमायुरस्तीति ततः शीघ्रं विमानेन भुवमागत्य हरिं शरणं गत इति प्रसि-
द्धं स्वर्गभूमिः पृथ्वी १३ तव तु न तथेत्याह तवापीति एतर्हि इदानीं सप्ताहमवधिर्यस्य तावता कालेन सांपरायिकं पारलौ-
किकं साधनं संपादय १४ तत्रैव संक्षेपतस्तावदाह अन्तकाल इति गतसाध्वसः निर्भयः सन् असं-
गो नाम अनासक्तिः तेन शस्त्रेण स्पृहां सर्वविषयाकांक्षां छिंद्यात् देहमनु ये पुत्रकलत्रादयः तेषु च स्पृहां छिंद्यात्
१५ किंच गृहात्प्रव्रजितः निर्गतः गृहे स्थितस्य पुनरासक्तिसंभवात् तत्रादौ यमनियमानाह धीर इति
ब्रह्मचर्यादियमोपलक्षणं पुण्यतीर्थेति स्नानादिनियमोपलक्षणं आसनमाह शुचाविति वि-

खट्वांगो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिं १३ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः उपकल्पय तत्सर्वं तावद्यत्सांपरायिकं १४ अन्तकाले तु पुरुष आगते गतसाध्वसः छिंद्यादसंगशस्त्रेण स्पृहां देहेनु ये च तं १५ गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः शुचौ विविक्त आसीनो विधिवत्कल्पितासने १६ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् १७ नियच्छेद्विषयेभ्योक्षान्मनसा बुद्धिसारथिः मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया १८ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा

विविक्ते एकांते विधिवत् कुशाजिनचैलैः क्रमेण निर्मिते आसने १६ जपप्राणायामौ वक्तुं जपमाह त्रिवृत् त्रिभिरकारा-
दिभिर्वृत्तं ग्रथितं ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् आवर्तयेत् मनसा इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियममाह
मनो यच्छेदिति ब्रह्मबीजं प्रणवमविस्मरन् वाजितश्वासः सन् १७ प्रत्याहारमाह नियच्छेदिति अक्षान् इंद्रियाणि नियच्छेत् सात्त्विकं
बुद्धिः सारथिर्यस्य सः धारणामाह मनः इति पुनः कर्मभिः यज्ञादिभिराक्षिप्तं पुराकृष्टं शुभार्थे भगवद्रूपे ध्यानमाह तत्रे-

अतः परं श्रेयो नास्तीत्याह एतावानिति एतावानेव जन्मनो लाभः फलं तमाह नारायणस्मृतिरि
ति सांख्यादिभिः साधनैरिति तेषां स्वातंत्र्येण लाभो नैवास्तीति सूचयति सांख्यमात्मानात्मविवेकः योगोऽष्टांगः अंते च
स्मृतिः परो लाभः न तु जन्मन्निमानेव केवलं तत्र तात्पर्यं ॥ ६ ॥ तत्र सदाचारं प्रमाणयति प्रायेणेति विधिनिषे
धतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म श्रीमद्धरेः किमिदं महत्सर्वं कथयामि मत्समा
नाम्नैवमेव रमित्याह इदं भागवतमिति तत्राम कप्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतुल्यं यद्वा ब्रह्म
सम्यक् मितं येन उक्तं तत्त्वया श्राव्यमतः आह अधीतवानिति मिदं सत्तव उक्तो अध्ययनप्रवृत्ति तत्राह परि

मूल
एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया जन्मलाभः परः पुंसामंते नारायणस्मृतिः ६
प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ७ इदं भाग
वतं नाम पुराणं ब्रह्मसंमितं अधीतवान्द्वापरादौ पितुर्द्वैपायनादहं ८ परिनिष्ठितोपि नैर्गुण्य
उत्तमश्लोकलीलया गृहीतचेता राजर्षे आख्यानं यदधीतवान् ९ तदहं तेभिधास्यामि महापौ
रुषिको भवान् यस्य श्रद्दधतामाशु स्यान्मुकुंदे मतिः सती १० एतन्निर्विद्यमानानामिच्छतामकुतो
भयं योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं ११ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह वरं मु
हूर्तं विदितं घटते श्रेयसे यतः १२

निष्ठितोपीति गृहीतचेता आकृष्टचित्तः ९ महापौरुषिको विष्णुभक्तः तदीयः यस्मिन् उक्ते तां सतीं अहैतुकी
१० साधकानां सिद्धानां च नान्यत्परममस्ति श्रेय इत्याह एतदिति इच्छतां कामिनां तत्तत्फलसाधन
मेतदेव निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं नात्र प्रमा
णं वक्तव्यमित्यर्थः ११ अल्पमेवायुरवशिष्टं किं महत्साधयेयमिति मास्तु चेत्याह किमिति बहुभिः परोक्षै

स्खलितैर्हायनैर्वर्षैर्विदितं ह्यायातीति ज्ञाते येन ज्ञाते
नव्यवेतयत्नं करोति १२ ॥

श्री
भाग
द्विती
य

ज्योतिरनीकं ज्योतिर्धामस्य हृत्स्वर्गं महर्लोकं ग्रीवेति गृणन्ति तपोलोकं वराटीं ललाटं सत्यं सत्यलोकं २८ उर्ध्व
देवाः तेजोमयशरीरत्वात् तएव बाहव उस्राः दिशः अस्य तादिग्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्रस्याधिष्ठा
नं शब्दः श्रोत्रविषयः सतस्य श्रोत्रेन्द्रिय एव नासिकादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासापुटे इद्धः दि
प्तः २९ द्यौरक्षिणी अक्षिगोलकौ चक्षुरिन्द्रियं पतङ्गः सूर्यः अहनी रात्र्यहनी परमेष्ठिधिष्ण्यं ब्रह्मपदं ता

3

उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य तपो ललाटीं विदुरादिपुंसः सत्यं तु शीर्षाणि
सहस्रशीर्ष्णः २८ इन्द्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः नासत्यदस्रौ परमस्य
नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः २९ द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च त
द्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ३० छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यम
स्नेहकला द्विजानि हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ३१ व्रीडोत्तरौष्ठोऽधर एव
लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ३२
नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र अनन्तवीर्यः श्वसितं मातरिश्वा गतिर्वयः क
र्म गुणप्रवाहः ३३॥

लूः अधिष्ठानं जिह्वा इन्द्रियं ३० छन्दांसि वेदाः शिरो ब्रह्मरन्ध्रं स्नेहकलाः पुत्रादिस्नेहलेशाः द्विजानि दन्ताः च
कलमार्षे दुरन्तसर्गः इति यत्सत्तस्य कटाक्षः ३१ अधर्ममार्गोऽस्य पृष्ठभागः प्रजापतिः मित्रौ मित्रावरुणौ
३२ अनन्तवीर्यं यस्यासः वयः कालः तस्यागमनं गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा ३३ ॥

प्रसीदति उपशाम्यति गुणावस्थातम्तन्त्रयितो भमतिधारणामेव स्थिरीकुर्यादित्याह रजसा प्राप्तिमंत मसा विमूढ मी
यमनोनिरोधात् तत्रापि रजस्तमोभ्यां कृते १९ यत यमाय मा णायो भङ्गस्य बात्मकं प्राश्रये विषयपथपतने
वशी तिर्भवति २१ यथा यत्र याह शीवेति कर्तव्यता विषयत्त द्विषणाना प्रश्नः २२ यथेत्य मोत्तरं जितमनःशि
गातेन विषयं नेव मत्तत म्लो विद्याइ जीवनियता भगवानेव विषयत्वाह आऽङ्कीघातवेति निकयहपवक्षति ।
पदे तत्परमं विश्रामं मनो यत्र प्रसीदति । रजस्तमोभ्यां मा तिष्ठ विमूढेन मन आत्मनः १९ यस्तेऽधारणा
याधीराहितियातन्त्र तमलम् २० यतः मधार्यमाणायां याति नाभक्तिलक्षणाः २१ प्राप्नुमं पश्यते
योगा प्राप्तमभप्रसीदतः २२ श्रीराजोवाच यथा संधार्यते ब्रह्मन् धारणा यत्र संमता कीदृशी वाह
रेदाशु पुरुषस्य मनोमलं २२ श्री कोवाच जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः स्थूले भग
वतो रूपे मनः संधारयेद्धिया २३ विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसां यत्रेदं दृश्यते विश्वं भूतं भ
व्यं भवच्च यत् २४ आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः
२५ पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलं महातलं विश्वसृजोऽथ गुल्फौ तलातलं
वै पुरुषस्य जङ्घे २६ द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च महीतलं तज्जघनं महीप
व्यावरणे नतः प्राप्ते जोवाघाकाणां हे कारस्मृतनितानीतिसम २५ विराड्देहतजीवत्तदनयामिणामभेद
मारोपणीयामनेकर्तव्य मित्यापायन्नाह पातालपादस्मूले पातालादीनां स्वदयवता विधीयते पातालादी
न्यतलातानि प्रथमलत्ताना तारभ्य मम्भूमि विवर्णाणि पदे तिपार्ष्णि तित्यादि प्रमाणा मद्रपणां ने पार्ष्णिप्रपदे पादस्य
पश्चान्तरो २६ ऊरुद्वयं तस्य प्रथो भागो वितलं ऊर्ध्वभागो अतलमिति तिं तय नाभिरवसर २७ ॥

श्री भा० द्वि० ५

इयानेतावानसौ संनिवेशः अतएव स्थविष्ठेऽस्मिन्स्वबुद्ध्या मनः संधार्यते मुमुक्षुभिः यतो व्यतिरेकेण किंचि
यन्नास्ति तस्मिन् ३८ तदेवं विचित्रमैश्वर्यं धारयित्वा विराड्देहजीवस्वरूपाणामपि भेदेनोपासनमुक्त्वा तत्र देहजीवांशस्त्रो
प्रविलाप्य सर्वधीवृत्त्याय इति निर्धारयति सइति सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एक एव सर्वान्तरा
त्मा तमेव सत्यं भजेत अन्यत्र प्रपंचे न सज्जेत यत आत्मपातात् आत्मनः पातः संसारो भवति एकस्य
तत्रादीन्द्रियैः सर्वान्भूतो हष्टान् स्वप्नजनानीक्षिता यथेति स्वप्ने हि कदाचित् बहून्देहान्प्रकल्प्य

इयानसावीश्वरविग्रहस्य यः संनिवेशः कथितो मया ते संधार्यतेऽस्मिन्वपुषि स्थविष्ठे मनः
स्वबुद्ध्या न यतोऽस्ति किंचित् ३८ स सर्वधीवृत्त्यनुभूतसर्वः आत्मा यथा स्वप्नजनेक्षितैकः
तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ३९ इति श्रीभागवते महापुराणे द्वि
तीयस्कंधे प्रथमोऽध्यायः **श्रीशुक उवाच** ॥ एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तु
ष्टात् तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः १

जीवस्तत्रादीन्द्रियैः सर्वं पश्यति न तु ईश्वरस्य विद्याशक्तित्वान्न लेपः ३९ इति श्रीभावार्थदीपिकायां
द्वितीयस्कंधे प्रथमोऽध्यायः १ द्वितीये ततः स्थूलधारणानिर्जितमनः सूक्ष्मसाक्षिणि सर्वेशे विलयो ध्येय
मितीर्यते हरिपालेवन्नरूपैवमुक्ता वैराजधारणा इहोक्ता तत्प्रसाध्या सर्वान्तर्यामिधारणा तत्र तावत्
वैराजधारणायाः अवान्तरफलमाह एवमिति एवं धारणया आत्मयोनिः ब्रह्मा प्रलयसमये नष्टां स्मृतिं
प्रत्यवरुध्य लब्ध्वा भगवतो योगिदीविश्वयथासीत् तथा ससर्ज वाव सा यात्मिकाऽबुद्धियं सर्वतपत्रामा

श्रीभवति ॥ = ॥

भूम्नः विभोः अव्यक्तं प्रधानं सम्प्रसिद्धः चन्द्रमाः तदीयं मनः सर्वेषां विकाराणां कोशः आश्रयभूतं अथ
विज्ञानशक्तिं चित्तं महिं महत्तत्त्वं सर्वात्मनः करणम् अहंकारं गिरित्रं श्रीरुद्रं दर्शमाहुः यामश्वतर्यश्व
तरी अथ वयांसि पक्षिणः तस्य व्याकरणं नाम रूपे व्याकरोतीति अन्यक्तं शिल्पनैपुण्यं यथाह येन शुक्ली
कृता हंसाः शुकाश्च हरितीकृताः मयूराः चित्रिता येन स तेषां वृत्तिं विधास्यतीति मनुः स्वायंभुवः मनीषाबु
द्धिः मनुजः पुरुषः निवासः आश्रयः पुरुषेणैव विलसतीत्यर्थः गन्धर्वादीनां द्वन्द्वैकवत् गन्धर्वादयः।

ईशस्य केशान्विदुरम्बुवाहान्वासस्तु सन्ध्यां कुरुवर्य भूम्नः। अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः स
र्वविकारकोशः ३४ विज्ञानशक्तिं महिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम्। अश्वाश्वतर्युष्ट्र
गजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ३५ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा
मनुजो निवासः। गन्धर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः ३६ ब्रह्मा
ननं क्षत्रभुजो महात्मा विडूरुरङ्घ्रिश्रितकृष्णवर्णः। नानाभिधाभीज्यगणोपपन्नो द्रव्या
त्मकः कर्मवितानयोगः ३७

स्वरस्मृती षड्जादिस्वरस्मृतयः अस्य अर्थः असुरानीकं वीर्यं यस्य स्वरस्मृतिरसुरानीकवीर्यः इति पाठे गन्ध
र्वादयः स्वराः असुराः सप्तस्वराः प्रह्लादः स्मृतिरस्येति ३६ ब्रह्म विप्रः तस्याननं क्षत्रं भुजा
यस्य विट् वैश्य ऊरू यस्य अङ्घ्रिश्रितः कृष्णवर्णः शूद्रो यस्य नानाभिधानानि यानि अभीज्या देवा
स्तेषां गणो विस्तरो दीप्तिरूपपन्नो युक्तः द्रव्यात्मकोऽतिः साध्य वितानयोगः यज्ञप्रयोगः तस्य कर्म

श्री
भाग.
द्वि. टी.
५

तदा तेन किं कर्तव्यं हरिस्मरणमेवेत्याह एवमिति विरक्तः सन्ननन्तं भजेत भजनीयत्वे हेतवः स्वचित्ते स्वत एव सिद्धः
यत आत्मा अत एव प्रियः प्रियस्यापि असत्त्वमाशंक्याह अर्थः सत्यः नन्वनात्मवत्क्षयिष्णुः भगवान् भजनीयगु
णः अनन्तः अविनाशी एवंभूतं तं भजेत नियतार्थः निश्चितस्वरूपः तदनुभवानन्देन निर्वृतः सन् इति स्वतः सं
सारस्य दर्शितं किं च यत्र यस्मिन् भजने सति संसारहेतोरविद्यायाः उपरमो नाशो भवति एतदेवान्यचिन्ता
निरूढ्याद्दृढयति नान्यथा भूतानां समाहारं विना चिन्तां परात्मना हरिणा पश्यन्तः कर्मजन्मानि विनाश्य यापश्य
वायसदेवानामिति स्मृतेः असन्नी विषयचिन्ता को नाम कुर्यात् तथा चिन्तयावतरणं पतितं तत्रस्थक

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः तं निर्वृतो नियतार्थो भजेत संसारहेतूपर
हं मश्च यत्र ६ कस्तां त्वनादृत्य परानचिन्तामृते पशूनसतीं नाम कुर्यात् पश्यन् जनं पतितं वैतरण्यां
स्वकर्मजान् परितापान् जुषाणम् केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तं
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ८ प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिं
जल्कपिशङ्गवाससम् लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ९ ॥ ॥

मं जानन् आध्यात्मिकादलं प्राप्नोति वमानेन जनेन पशून् वै तरणीय महद्वारस्यान्नदीत्वाल्लघ्वात् सेहति वैतर
णी ७ नामवधारणामविशेषमाह केचिदिति षड्भिः स्वदेहस्यान्तः मध्ये यत् हृदयान्तः अवकाशः
तस्मिन् वसन्तं प्रादेशः तर्जन्यङ्गुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्य तं हृदयपरिमाणेन अपरिच्छिन्नमिति कं
जं पद्मं रथाङ्गं चक्रं ८ नलिनवत् प्रसन्नं प्रसन्ने आयते दीर्घे ईक्षणे यस्य कदम्बकुसुमस्य किञ्जल्काः न
केसराः तद्वत् पिशङ्गेन पीतेन वाससा वीयस्य लसन्ति महारत्नानि येषु तानि हिरण्मयान्यङ्गदानि यस्य
स्फुरन्ति महारत्नानि च तन्मयानि किरीटकुण्डलानि यस्य ९ ॥ ॥

उपासनाफलादपि विरक्तस्यास्य तद्धाम धाराणां वा समधिकारः अतो वैराग्यपार्थक्यं सर्वकर्मफलेनिर्दिष्टेति यदाह शाह मयैव स्वेदः तं मे ब्रूहि शृण्वानः कर्मफलबोधनप्रकारः कोऽसौ ग्रन्थः सूत्रैर्यः स्वर्गादिनाम भियोगादकस्पधीर्ध्याययति ततोऽति क्लोकरातीति युक्तमर्थान्तमेवाह तत्र मायामयोऽपि भावमितिवो मनयाथार्थालोः सम्भान्तः एष तु स्वयोरथ मन् अर्थान् न विदन्तीति तल्लोकप्रामोऽपि निरवधं सर्वं लभतस्त्वर्थः १ तर्हि सर्वथा कर्मफलत्यागो मयपर्यवदा ह्ययातः स्यादित्याशङ्क्याह अतः कविर्नाम मात्रेषु भोगेषु याबातार्थं नेदं हि निर्वाह्ययमपत्यामतः स्यात् अत्र सन्नः तावन्मात्रेण नामसन्ना व्यवसाययाबुद्धिः नेदं भावमिति निश्चयवानतयापि तत्र भिन्नं तं सर्वोत्तमवसिद्धम्

पाहस्यहि ब्रह्मणाप्यपर्ययाय नाम भिर्धायतिधीरपार्थः परिभ्रमं तत्र न विंदते श्रीवायामयेवामन पायायान् २ अतः कविर्नामसत्यावदर्थः स्यात् प्रसन्नो व्यवसायबुद्धिः सिद्धस्य पार्थं नयतित्र भयः परिभ्रमं तत्र समीक्षमाणाः ३ सत्याति तो किंवा यो प्यामेवा हो सिद्धस्य पवर्हणाः किं मत्तं सलौकिं पुत्रधानपाद्यादि स्थूलकालादौ मति किंकृत्ये ४ चौराणां किंपथि नसंतिदृ यातिभिक्षाने वा क्रियाः पस्मृतः सवितोपस्थान् कस्मायनाः किमसजितावत्तिनापपन्नाकस्मा जातिकवयोध

ति तत्र यत्ने परिभ्रमं पयपत्र नयतेतत ३ अन्यथासिद्धिमाह सप्यो स्त्रयामिकाश्रियो पाययायाः स्वतः सिद्धत्वा हो भगति उपवर्हणोऽपधीर्षकेः पुत्र तथा वर्णप्रकारयाम्रपात्रभोजनपात्रे ४ ननु द्विकसद्भावो नाम सगवमेव वल्कलेष्वत्रेतायेवामः स्याने नायात्र प्रयत्नो विना कथं प्राप्यते तत्राह चौराणि विसावेझानिपदानभ्रमतिफ लैति फलादि मियं गृह्णाति विद्यं ननु कस्यचिद् वेधामलाभे किं कार्यं तत्राह अजितेति उपसन्नो नयाणी यातान् किं नयवतिं निरतस्मि किं पालस्पर्दं वनाधिनं वेधः पदेनेनयोऽहं मदः तेन सेधान्तान् ॥ ५ ॥

श्री भा. द्वि. टी. ८

एवंतावदासन्नमतेः श्रमः क्रममुक्तेः । इदानींतस्यैवत्वयंदेहंयुञ्जतोमिक्तं कस्यमाहस्थिरमितिसार्धैस्त्रिभिः
अङ्गहेराजन्नेवंभूतोयतिर्यदायमेलोकंदेहंजिहासुः हातुमिच्छेत्तदादेशेपुण्येक्षेत्रेकालेचउत्तरायणा
दौमनोनासज्जयेत्तत्संगंनप्रापयेत् नदेशकालयोगिनःसिद्धिहेतू । किंतुयोगएववितिहेतुरितियथाभूतस्थि
रंसुखंचकालेनासनमास्थितःप्राणान्नियच्छेदित्यादि ।१५। एतांबुद्धिंक्षेत्रज्ञेद्रष्टरिनिनयेत्तमविलाय
येत । तंक्षेत्रज्ञमात्मनिशुद्धे । तंचशुद्धमात्मानमात्मनिब्रह्मणिशुद्धेब्रह्मणिअवरुध्यव्यापकोक्तेनल

स्थिरंसुखंचासनमाश्रितोयतिर्यदाजिहासुरिममंगलोकं । कालेचदेशेचमनोनसज्जयेत्प्राणानि
यच्छेन्मनसाजितासुः ॥१५॥ मनःस्वबुद्ध्यामलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमात्मनि । आत्मा
नमात्मन्यवरुध्यधीरोलब्धोपशान्तिर्विरमेतकृत्यात् ॥१६॥ नयत्रकालोऽनिमिषांपरःप्रभुःकुतो
नुदेवाजगतांयईशिरे ॥ नयत्रसत्त्वंनरजस्तमश्चनवैविकारोनमहान्प्रधानम् ॥१७॥ ॥

लब्धोपशान्तिः प्राप्तानिर्वृतिः सन्कृत्याद्विरमेत । ततःपरंप्राप्याभावात् ।१६। तदेवाह नयत्रेतियत्रात्मस्वरूपे
कालोनप्रभुः किमपिकर्तुंनसमर्थः अतोदेवाःनप्रभवन्तीत्याह । अनिमिषांदेवानांपरःप्रभुः । काला
पियत्रनप्रभुः तत्रकुतोनुदेवाःप्रभवेयुः देवानियम्यानांजगतांप्राणिनां कावार्तेत्याह । जगतामिति
कुतोप्रभवन्तीत्यपेक्षायांनिरुपाधित्वादित्याह । नयत्रेति । विकारः
अहंकारः ।१ ॥

6

उन्निद्रे विकसति यत् हृत्पंकजं तत्सवर्णिकावालयः स्याते तस्मिन् योगी श्रेरास्थापितो पादपल्लवो यस्य श्रीव
लक्ष्मचिह्नितघनं तं यामादिविहितोमनः धीयालक्ष्यः कौस्तुभरत्नकंधरायां यस्य अम्लानालक्ष्मीशोभायस्मि
नयावनमालयाचिन्वे व्याप्तं १ किंभूतवादिविधिपीठं कुंतलविरोचमानं आननयाहासं तेनपपालसुंदरं २
अदीप्तदीयलीलाहसितं ततनयदीनतातस्मिन् उलसितायाधर्मभाः अविनेयाः तेमहचितास्मीनसुग्रहः ये

उन्निद्रे हृत्पंकजकर्णिकालये योगीश्वरास्थापितपादपल्लवं श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्ला
नलक्ष्म्यावनमालयाचितम् १ विभूषितं मेखलयांगुलीयकैः महाधनैर्नूपुरकंकणादिभिः स्नि
ग्धामलेकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं २ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगस
न्दर्शितभक्तनुग्रहं ईक्षेत चिंतामयमेनमीश्वरं यावन्मनोधारणयावतिष्ठते ३ एकैकशोंगानिधियानु
भावयेत्पादादियावद्धसितंगदाभृतः जितंजितंस्थानमपोह्यधारयेत्परंपरंशुद्ध्यतिधीर्यथायथा ४ या
वन्नजायेतपरावरेस्मिन्विश्वेश्वरे द्रष्टरिभक्तियोगः तावत्स्थवीयःपुरुषस्यरूपं क्रियावसानेप्रयतः स्म
रेत ५ ॥

नचिंतामयं चिंतयाआविर्भवति १ अस्यैव ध्यानमाह एकैकशः इति अनुभावयेत् यद्यत् जितं अयत्नतःस्फुरि
तं पादगुल्फादिस्थानं अवयव तद्पो... परं परं जंघाजान्वादिधारयेत् शुध्यति तस्मिन्निश्चलाभवति २
एवं नवेगजधारणायां पूतस्वान्ताया तमाह यावदिति परेब्रह्मादयो वरेयस्मात् तत् विश्वेश्वरे द्रष्टरि तद्द्रष्ट्रा
चैतन्यचेतनत्वात् भक्तियोगः प्रेमलक्षणः क्रियावसाने आवश्यककर्मानुष्ठानानंतरं अनेन कर्मापि भक्ति
योगपर्यंतमेवेत्युक्तम् ॥ ५ ॥

श्री
भाग
द्वि टी
७

सद्योगतिमुक्त्वा क्रममुक्तिमाह यदीति द्वाभ्यां । यदि तु पारमेष्ठ्यं पदं प्रयास्यन् न विविति वैहायसानां खेचराणां
यद्विहारस्थानं ब्रह्मस्थानं कीदृशं अष्टाधिपत्यं अणिमाद्यैश्वर्यं यस्मिन् तदपि प्रयास्यन् तर्हि गुणानां सन्निवे
ये गुणसमवायं सूक्ष्मोपाधिं तमादाय सर्वैः सहैव गच्छेदित्यर्थः २२ ननु देहत्यागावसरे मनइन्द्रियाणि च न त्यजेत् किं तैः सहे
वं तर्हि ब्रह्मलोकभोगार्थं गच्छेत् यतः कर्मगतिवन्न योगगतिः परिच्छिन्नेत्याह योगेश्वराणां त्रिलोक्या अन्तश्च
बहिश्च महर्लोकादिषु ब्रह्माण्डाद्बहिर्वा गतिमाहुः अत्र हेतुः पवनस्यान्तः आत्मा लिंगशरीरं येषामिति विद्याउपा
सना तपो भगवद्धर्मः योगो ध्यानं समाधिः तान् ये भजन्ति तेषां योगिनाम् २३ तामाह वैश्वानरमिति

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्
मनसेन्द्रियैश्च २२ योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनां न कर्मभिस्तां गति
माप्नुवन्ति विद्यातपोयोगसमाधिभाजां वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन
शोचिषा विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारं तद्विश्वनाभिं त्वतिवर्त्य वि
ष्णोरणीयसा विरजेनात्मनैकः नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ति २५

वृत्तिः विहायसा आकाशेन तत्रापि ब्रह्मलोकपथेन गतः सन् प्रथमं वैश्वानरमग्न्यभिमानिनीं देवतां
याति केनोपायेन सुषुम्णया नाड्या अर्चिरादिमार्गेण शोचिषा ज्योतिर्मय्या विधूतः
नष्टः कल्को मलो येन सः क्रमेण सञ्जमानः ऊर्ध्वं उपरिष्टाद्धरेर्मानदर्शनस्थिताद्धरेः सर्वाधिष्ठाना
रूपं परायणाधिष्ठितमित्यर्थः शैशुमारं चक्रं यत्र सकलं ध्रुवपर्यन्तं शिशुमाराकारं ज्योति
श्चक्रं चक्रस्थानि आदित्यादिप्रभृतीनि पदानि प्रयातीत्यर्थः २४ तद्विश्वनाभिमिति चक्रं विश्वस्य
नाभिं तु यो यस्य अयं भूतः आविष्टलिंगत्वात् नाभिप्राकृष्टन षट्तत्त्वं अतिवर्त्य अतिक्रम्य परतः स्व

गौणशुक्लभगवान् अयं: २५॥

७

निरुपाधित्वं कुतस्तत्राह परमिति यद्यस्मात्तत्र तत्त्वात्मविश्रान्तिरिन्निनेतीत्येव सात्त्विकमिच्छवोदेशास्य
देहाद्यात्मत्वेविसर्जनश्चाहंममप्रत्ययम्पत्नीविसोः परप्रदेपदेत्तातोलाणात्वाउपकुल्ख्आत्विषयनोन्यमिन्मोहदये
घातथाभूताः मताः तहेसमात्वपदे सतपव परमेवन्तः अहंममामनेतिप्रत्ययः १८ तस्मादित्यवृह्मतेनव्यवस्थितो
मुनिरूपरमेत तथाहेनयदिप्रयास्यतिप्रतिवत्यमाणात्मकाशाहिपाघउन्तः तमाहविज्ञायतेनेनेतिविज्ञानेपा
हैतेनज्ञाताहंकुज्ञानेनस्ववीर्यंबलेनेनस्तुरोधितःविहितमितः अथायाविषयघयवास्तनायसमः इदानीतस्पदेक्षः

परंपदं वैभवमामनेतितिघ्नेन्तिनेतीत्यतइत्तिमहतत्वः विसृज्यदेशात्मममनन्यमोहदाहदोपशून्याहंप
देपदेपदे १८ इत्यमनिरूपरमेसावस्थितोविज्ञानहंस्ववीर्यंसुरोधितापायः स्वपार्ष्णिनापीडयगुदंततो
निलेस्थानेषुषट्सुत्रमयेजितेक्रमः १९ नाभ्यांस्थितेहृद्यधिरोण्ठतस्माउदानमात्यारक्षितेनयन्कृतिः
ततोनुसंधाययथियामनस्वीस्वतालुमूलेपानकेनैयेत २० तस्माद्भ्रुवोरन्तरमन्तरेयन्ततनिरुद्धसप्तायतनोन
पेक्षः स्थित्वामुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्यमूर्धनिविसृजेत्परंगतः २१ ॥

त्यागप्रकारमाह स्वपार्ष्णिनापादमूलेनगुदंमूलाधारंआपीड्यनिरुध्यप्रतिलोमप्राणसुत्नमेयेत ऊर्ध्वंनये
त् जितक्रमोयेनषट्सुस्थानेषुनाभ्यादिषु १९ नाभ्यांमणिपूरकेस्थितं हृदि अनाहतचक्रेअधिरोण्यउ
सिकंठादधोदेशेस्थितेविशुद्धिचक्रेमनस्वीजितचित्तः स्वतालमूलेतस्येवचक्रस्याग्रदेशेततोवहधागम
नसंभवात् शानकैःसंधिन्नं २० तस्माद्भ्रुवोरन्तरंआज्ञाचक्रं निरुद्धानिसप्तछिद्राणिनेत्रेनासिकेमुखंचेत्येवंसप्तआ
यतनानिप्राणाःसप्तायतनसः अनपेक्षः स्पृहासमानः सन्मूर्धन् मूर्धनिब्रह्मरंध्रंनिर्भिद्यतदेहमिंद्रिया

प्रकृतस्य भगवद्भक्तस्य तत्त्वमेदं भेदनप्रकारमाह तत इत्यादिना त्रयं प्रक्रियाई [illegible] तायाः प्रकृ
तेः केनचिदंशेन महत्तत्त्वं भवति तस्यांशेनाहंकारः तस्यांशेन तन्मात्रत्वेन नभः तस्यांशेन स्पर्शतन्मा
त्रत्वेन वायुः तस्यांशेन रूपतन्मात्रत्वेन तेजः तस्यांशेन रसः तन्मात्रत्वेनापः तदंशेन गंधः तन्मा
त्रत्वेन पृथ्वीति स्थूलमिलितैः स्थूलैर्दशभिर्भुवनात्मकं विराट्शरीरं तस्य च पंचाशत्कोटियोजनविशाल
स्य पृथिव्यादेः कटाहविशेषस्य ब्रह्मांडस्य कोटियोजनविशालप्रथमावरणं पंचाशत्कोटियोजन
विशालत्वे केन तस्य अवान्तरायपरावरताश्च तान्येवोत्तरोत्तरं दशगुणान्यावरणानि सप्तमतत्त्व
त्त्वावरणव्यापकमेव तदेव स्थितं पृथिव्या आवरणभेदप्रकारः कथ्यते ततो विशेषं प्रतिपद्य

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिमत्वरन् । ज्योतिर्मयो वायुमुपेत्य काले
वाय्वात्मना खं बृहदात्मलिंगम् २८ घ्राणेन गंधं रसनेन वै रसं रूपं च दृष्ट्या श्वसनं त्वचैव
श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी २९ ॥ राम ॥ राम

लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः एवमग्रेऽपि द्रष्टव्यं निर्भयः कथं यस्मान्निःशंकास
नः तेनात्मना पृथिवीरूपेण ततोपि ततस्तावापः प्रतिपद्य अनलं त्वरन्नागमक्रमेण तत्तदात्मत्वेन तत्त्वे
ददाहादिपीडाभावाद्घ्राणभागान्भुंजानः इत्यर्थः एवं ज्योतिर्मयः सन् कालेन भागावसाने बृ
हत् आत्मनो लिंगोपरमात्ममूर्तित्वेनोपासनेन प्रत्यक्षं यद्भावदशा ह्यात्मा नातत्प्रमापकमिति

इन्द्रियार्थानां भूतसूक्ष्माणामतिक्रममाह घ्राणेनाधिष्ठितेन गंधमुपेत्य
श्रवणेन स्पर्शेन नभोगुणत्वं शब्दात्मतां प्राणेन तत्तत्कर्मेन्द्रियाणामाकूतिं
तत्तत्क्रियाम् २९ ॥

अथानंतरं कल्पांते विश्वं त्रैलोक्यं ग्रसता येन दह्यमानं निरीक्ष्य तत्राप्यसमर्थास्ते द्विपरार्द्धं स्थायितत्परमेष्ठिप
दं प्रति निर्याति सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिन् तत् उपतिष्ठेद्यांश्चित्ते २६ तदेवाह यत्रेतिया
तिद्वः द्विपरार्द्धे भयं किंतु विज्ञानेहितयतोऽयं तद्वः द्विपरार्द्धः अतो तदेकेन विना तज्ज्ञानो भवति अनिदंविदां दुरंतदुःखभाव

अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैप
रार्ध्यं तदु पारमेष्ठ्यं २६ न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् यच्चित्ततोऽदः
कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात् २७ ॥

ततो ध्यानसमुत्थानतोऽप्राणिनां तद्दुःखं तद्दुःखयोः प्रभवो जन्म तस्यानुदर्शनात् तेन शोकरूपया यद्वा चित्ततोऽदो
मनः पीडेति यत्र ततु विना कुतश्चित् दृष्टिपि यत्र शोकादयो न संतीति तत्र ब्रह्मलोके गतानां त्रिविधा गतिः ये
पुण्योपचयेन गताः ते कल्पांते पुण्यतारतम्येनाधिकारं भवंतीति यत्तु हिरण्यगर्भोपासनाबलेन गताः
ते ब्रह्मणा सह मुच्यंते यत्तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्त्वा वैष्णवं पदं यान्तीति २७ ॥

श्री
भाग
द्विटी
९

ऽतिसंमतः पुंसो बहवो मोक्षमार्गाः तत्र योगमार्गेषु समीचीनं तमेवेत्याह नहीति यतो भक्ति
योगो भवेत् अतोऽन्यः शिवः शोभनः पन्था निर्विघ्नः स्वनास्ति ३३ कृत्कार्णतदित्याह भगवानिति कूटस्थः
निर्विकारः एकाग्रचित्तः सन् त्रिः त्रीन्वारान् कार्त्स्न्येन साकल्येन ब्रह्मवेदमन्वीक्ष्य विचार्य यत
आत्मनि हरौ रतिर्भवेत्तन्निश्चितवान् ३४ ननु कथंभूते रतिर्भवति अतः कथंभूत भगवति कथं रतिः स्यात्
तत्राह भगवानिति लक्षितः दृष्टः कथं स्वात्मना ... तत्र ताभ्यामिति याकेहदृश्यैर्बुद्ध्यादिभिः तदेव द्रष्टा
दृश्यायति दृश्यानां जडानां बुद्ध्यादीनां दर्शनं स्वप्रकाशं द्रष्टारं विना नोपपद्यते तद्भावपत्ति स्वे

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह वासुदेवे भगवति भक्तियोगो यतो भवेत् ३३ भग
वान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवेत् ३४ भगवा
न्सर्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मा
त्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ३६ पि
बन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं पुनन्ति ते विषयविदूषिता
शयं व्रजन्ति तच्चरणसरोरुहान्तिकं ३७ इति श्रीभागवते द्वितीयस्कंधे द्वितीयोऽध्यायः २

लक्षणैः स्वप्रकाशं तर्थामिलिलक्षैः तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति
व्याप्तिमत्त्वेन अनुमापकैः स्वतन्त्रकर्तृतियेवमीश्वरसिद्धिः ३५ यत एवं श्रोतव्यमित्यादिप्रश्नोत्तरमुपसंह
रति तस्मादिति ३६ श्रवणादिफलमभिनयेनाह पिबन्तीति सतामात्मनः आत्मत्वेन प्रकाशमान
स्य कथैवामृतं विषयैर्विदूषितं मलिनीकृतमाशयं पुनन्ति शोधयन्ति तस्य चरणपद्मान्तिकं श्रीवि
ष्णुपदं व्रजन्ति इति श्रीभागवते द्वितीयस्कंधे द्वितीयोऽध्यायः

तदेवं स्थूलसूक्ष्मभूतानामतिक्रमसङ्घातताणां भूताहङ्काराप्रात्यामहदादिप्राप्तिमाह सभूतसूक्ष्मेति विकार्यं सं
साद्य विज्ञानतत्त्वं याति विविधकार्यसम्पत्ति विकार्योऽहङ्कारः सत्त्रिविधः तामसो राजसः सात्त्विकः इति तत्तामसो
ऽत्र भूतसूक्ष्माणि राजसेनाहङ्कारेणेन्द्रियाणि निर्दिष्टेन्द्रियाणां सात्त्विकात्मनः इन्द्रियदेवाश्चेतनालयश्चात्तत्त्वदह
ङ्कारेत भूतसूक्ष्माणामिन्द्रियाणां सन्निकर्षं लयं स्थानं तामसराजसस्थं मनोमयं देवमयं च सात्त्विके प्राप्य गत्या
एवं गमनेन तस्मादहङ्कारेण महद्विज्ञानतत्त्वं याति ततः गुणानां सन्निरोधं लयायस्मिन् तत्प्रधानं याति ३ तेनात्मा
नाप्रधानरूपेणानन्दमयः सन्नुपाटेना सवमानेणानमावि ... मानन्दपरमात्मानस्वरूपेण निविशते तेनावते

सभूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्यम् । संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुण
सन्निरोधम् ॥ तेनात्मनात्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने । एतां गतिं भागवतीं गतो यः स वै
पुनर्नेह विषज्जतेऽङ्ग ॥ ३१ ॥ एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह सनातने च । ये वै पुरा ब्रह्मण आह पृष्ट
आराधितो भगवान्वासुदेवः ॥ ३२ ॥

तत्त्वार्थः ३१ एते सृती मार्गौ प्रकाशावित्यर्थः हे नृप एते निर्भिद्य मूर्धानं ... इति सद्योमु
क्तिः एकास्मृतिः यदि प्रयास्यन्नित्यादिना क्रममुक्तिश्च याऽहिती या एते सृती वेदगीते उक्ते न तत्र ... इति
तत्र यदा सर्वे प्रमुच्यन्ते कामा यस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति सद्योमुक्तिः तेऽर्चिरभि
सम्भवन्तीत्यादिना क्रममुक्तिर्वेदेनोक्ता ... कर्मभिः लोकान्तिमार्गौ ... वेदोक्तौ ... स्थापितौ ... वितत्य
ते सृती इति द्विवचनेन त्वया अभिपृष्टे यत्र ज्ञातव्यमित्यादि प्रश्ने ... विषये अपि सृती पृष्टे ब्रह्मणा हि यद्वा वि
पर्ययमिति वदति ... पृष्टः एवं तत्र ... एते सृती इत्यर्थः ३२ ॥

श्री
भाग
द्वि टी
९

यज्ञं यज्ञोपाधिं विष्णुं कोशो धनसंचयः वसुकाम इति धनमात्रमिति भेदः। दांपत्यमन्योन्यप्रीतिः तदेवा
र्थो यस्य सः॥ ७ ॥ धर्मार्थः धर्मकामः उत्तमश्लोकोपाधिविष्णुं तंतुं संतानं तन्वन् वृद्धिं कुर्वन् रक्षा बाधानिवृ
त्तिः तत्कामः पुण्यजनान् यक्षान् ओजो बलं तत्कामः मरुद्गणान् देवान् राज्यं राजत्वं तत्कामो मनून् म
न्वंतरपालान् राजकः राज्यं तत्कामो विश्वान् देवानिति विशेषः अभिचरन् शत्रुमारणमिच्छन् निर्ऋ

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ७
धर्मार्थ उत्तमश्लोकं तंतुं तन्वन् पितॄन्यजेत् रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् रा
ज्यकामो मनून्देवान् निर्ऋतिं त्वभिचरन्यजेत् कामकामो यजेत्सोमं अकामः पुरुषं परं ९ अ
कामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परं १० एतावाने
व यजतामिह निःश्रेयसोदयः भगवत्यचलो भावो यद्भागवतसंगतः ॥ ११ ॥

10

तिं राक्षसं कामकामः भोगेच्छुः अकामः वैराग्यकाम पुरुषं परं प्रकृतिव्यतिरिक्तोपाधिं ईश्वरं ९ अ
कामः एकांतभक्तः उक्तान् कामान् सर्वकामो वा पुरुषं पूर्णं निरुपाधिं १० सर्वोक्तनानादेवतायजनस्या
पि संयोगं पृथक्तेन भक्तियाफलत्वमाह एतावानिति इंद्रादीनपि यज
तामिह तद्यजनेन भागवतानां संगतो भगवत्यच
लो भावो भक्तिर्भवतीति यत् एतावानेव निः
श्रेयसस्य परमार्थस्योदयः लाभः अन्यत्

९

तृतीयेविस्पभक्तेषुवैपिष्ठोस्पाएवनामृतैः भक्तुरेकेणतत्कर्मश्रवणादर्दयंते इदानीमन्यदेवताभज
नस्यापिपुत्रादिभजनवदेवतत्फलत्वमहेयत्वञ्चपूर्वोक्तमनुवदतिएवमितिमेत्तिकदाचिदैवयोगे
नमनुष्यलोकेपुंसुजीवत्सुयममनीषिणांस्तेषांतत्रापिम्रियमाणानांतेषांविशेषतएवमेतत्तद्धरिकथाश्रवणादि
केनिरादितेविहितमित्यर्थः १ ब्रह्मणस्पतिंवेदपतिंब्रह्माणं इंद्रियपाटवकामस्तुइंद्रं प्रजापतीन्दक्षादीन् २

श्री शु: उ एवमेतन्निगदितंपृष्टवान्यद्भवान्मम नृणांयन्म्रियमाणानांमनुष्येषुमनीषि
णां १ ब्रह्मवर्चसकामस्तुयजेतब्रह्मणस्पतिं इन्द्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन् २ दे
वींमायांतुश्रीकामःतेजस्कामोविभावसुं वसुकामोवसून्रुद्रान्वीर्यकामोथवीर्यवान् ३ अन्ना
दिकामस्त्वदितिंस्वर्गकामोदितेःसुतान् विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोवि
शां ४ आयुष्कामोश्विनौदेवौपुष्टिकामइलांयजेत् प्रतिष्ठाकामःपुरुषोरोदसीलोकमा
तरौ ५ रूपाभिकामोगंधर्वान्स्त्रीकामोप्सरउर्वशीं आधिपत्यकामःसर्वेषांयजेतपरमे
ष्ठिनम् ६ ॥

मायांदुर्गांविभावसुमग्निंवसुकामः धनार्थीवीर्यंप्रभावःतत्कामोवीर्यवान्रुद्रान्यजेत् ३ अ
न्नाद्यंभोज्यमन्नंचअदितेःसुतानादित्यान्विशांदेशस्थप्रजानांसाधानमिच्छन्साध्यान्
४ इलांपृथ्वींप्रतिष्ठास्थानादच्युतिःरोदसीद्यावाभूमी ५ अप्सरसांमध्येउर्वशीचता ६ ॥

श्री
भाग
टि टी
११

ननुजीवनमेवतेषामायुषःफलमिति तत्राह तरव इति ननु तेषां श्वासो नास्ति तर्हि भस्त्राः समंकोशाः न च नाम
आहारादिकं नास्ति तत्राह न खादंतीति अनेन मेहतीति रेतः सेकं मेढ्रं नेकं वर्तिति किंतु ग्रामपशुवाकारेण पशुम
न्वाग्रपरे इति १८ तदेवाह श्वविडिति संस्तुतः सदृशानिंदितः यस्य कर्णपथं कदाचिदपि गदाग्रजः सः अव
तास्य दन्तान् श्वभिः कश्मलं विषयासक्तत्वात् विड्वराहे ग्रामसूकरे करे कंटकवान् उष्ट्रः खरो विषयासक्तत्वे
न उष्ट्रे भारवाहित्वात् एवं रूपत्वाच्छ्वपशुः १९ तस्याङ्गानि च निष्फलानीत्याह बिले इति पंचभिः वतेति वि

तरवः किं न जीवंति भस्त्राः किं न श्वसंत्युत न खादंति न मेहंति किं ग्रामपशवोऽपरे १८ श्वविड्वराहोष्ट्र
खरैः संस्तुतः पुरुषः पशुः न यत्कर्णपथोपेतो जातु नाम गदाग्रजः १९ बिले बतोरुक्रमविक्रमान्ये
न शृण्वतः कर्णपुटे नरस्य जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः २० भारः परं प
ट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदं शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौ वा २१
बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि ना
नुव्रजतो हरेर्यौ २२ जीवन्छवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु श्रीविष्णुपद्या मनुज

देन स्पृष्टावतः अस्पृष्टावतोनिश्चये कर्णपुटे बिले वृथा रंध्रे एवं चेदुपगायतीति तस्य जिह्वा असती दुष्टा दर्दुरी भेक
स्त्रीया जिह्वेव २० यत्नेन वस्त्राणि परिधाय किरीटेन जुष्टमपि शिरो यदि न नमेत् तर्हि केवलं भार एव शावौ मृतकः
तक उत्पलोहसतो कंचनकंकणायुतो शृण्यर्थं वा शाह २१ येनयन विष्णोर्लिंगानि निरीक्षितानि तेन बर्हायिते
मयूरपिच्छतुल्ये द्रुमवजन्मभजेत इति तथा वृत्तमूलनतुल्यात्वयर्थः २२ नभिलभेत अभितानसंस्पृष्टात्

भगवत इत्यनेन सूचितां हरिकथारतिं मोक्षमानमिति यत्तया सज्जाने भवति कीदृशो सामर्थ्यात् प्रतिनिवृत्तो उप
शान्तगुणोर्मीणां रागादीनां चक्रं समूहो यस्मात् उत्तमश्लोकं तं हेतुमात्मप्रमादं चक्रवर्त्यात्मसमत प्रमादहेतुगु
णेषु विषयेषु मेरोगाद्वैराग्यं च उभयत्रेति पादे इत्थं सर्वगुणेषु मेगा कैवल्यमित्येवं समेमत पंथायोजितया
गा निर्वृत्त भ्रवणात्स्वेन श्रन्यत्रानिर्वृत्त इति वा तामहरिकथामकोरतिं न कुर्यात् १२ अभिप्राह तंउन्तं ख्यपि

न्तानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रमाद उभयत्र गुणेषु समेगा कैवल्यं सेमत पंथयस्त्वयम
क्तियोगा को निर्वृत्तो हरिकथासु रतिं न कुर्यात् १२ पो कः इत्यभिव्याहृत्तराजानिपाम्यभ
तर्षभ: किमन्यस्पृष्टवान्भूयो वैयासकिर्महर्षिकविं १३ पतत्कुशूषितं विष्णुस्तत्तनो हंसिमाषि
ते कथाहरिकथोदर्का: सतां स्यु: सदसि ध्रुव १४ सर्वै भागवतो राजा पाण्डवेयो महारथ:
वालक्रीडनकै: क्रीडन्कृष्णक्रीडं यआददे १५ वैयासकिश्च भगवान्वासुदेवपरायण: उरु
गायगुणोदारा: सतां स्युर्हि समागमे १६ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ तस्यर्तेयत्क्षणो
नीत उत्तमश्लोकवार्तया १७ ॥

श्रमदर्पानेका विंशाहन्नमनिस्तानं १७ श्रवणेच्छायाहेतुं हरिकथासतां भागवतानां सदसि समायोस्यु: १४
पतत्सपंचयति समपवा इतिहास्यो लक्षसूत्रोदिनु पाला क्षयस्त्वाकर्तवान् १५ उरुगायगुणोदारा: मह
त्य: कथा: स्युः १६ किंवा हृष्येवनीयसाना माणुर्हरिकथा स्याम फलं गुणवित्याणयेनाहृत्विभिरायुरिति
श्रेमो सूर्य उघन्स्वइसुच्छन्न श्रमंच श्रदर्पा लयन्नगाबन्धयाणनतोन्नीत: तस्यर्ते आयु: श्रन्तेवर्जायितवान्त्येवह ॥ २६ ॥

श्री
भाग
हि टी
१२

यथा सृजति पालयति संयच्छति संहरति पुरुशक्तिः बहुशक्तिमान् ७ क्रीडन् यथा करोति आत्मानं
ब्रह्मादिरूपेण क्रीडयन् विकरोति विविधं करोति ८ एकः पुरुः बहुरूपेण युगपज्जन्मभिः ब्रह्माद्यवतारैः
क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति ९ विचिकित्सितं संदिग्धं शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मि
न्ननुभवेन १० उपामन्त्रितः सन् प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ११ तदे

यथा गोपायति विभुर्यथा संयच्छते पुनः यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ७
आत्मानं क्रीडयन् क्रीडन् करोति विकरोति वा नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः ८ दुर्वि
भाव्यमिवाभाति कविभिश्चापि चेष्टितम् यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा ९ बि
भर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा
शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भगवान् खलु १० सूत उवाच इत्युपामन्त्रितो राज्ञा गुणान
कथने हरेः हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ श्रीशुक उवाच नमः परस्मै पुरुष
यभूयसे सदुद्भवस्थाननिरोधलीलया गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानु
पलक्ष्यवर्त्मने १२ ॥

वाह त्रयोदशभिः परस्मै सर्वोत्तमाय तत्र हेतुः भूयसे अपरिमितमहिम्ने न दर्शयति सतः प्रपंच
स्योद्भवादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं
येन तस्मै अन्तर्भवाय अन्तर्यामिने अत एव सर्वान्तरत्वाद् अनुपलक्ष्यं

12

अश्मवत्सारो बलं काठिन्यं यस्य विक्रियालक्षणं नेत्रे इति गात्ररुहेषु रोमसु हर्ष उद्गमः यस्माद्भगवत्सर्व
मतस्तस्मिन्मनसोनुकूलं च प्रियं यद्भाषसे अयमर्थः साधु पृष्टः सन्वैयासकिः नृपतिं यदाह तदभिधेहीति २५ इ
ति श्रीभागवतभावार्थदीपिकायां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥३॥ चतुर्थे परीक्षिता पृष्टः सृष्ट्यादिहरिचेष्टितं।
शुकेन ब्रह्मनत्वा तस्य ब्रह्मसंवादेनोपवर्णितं १ राजप्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह चतुर्भिः वैयासकेः

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहे
षु हर्षः २४ अथाभिधेह्यङ्ग मनोनुकूलं प्रभाषसे भागवतप्रधानः। यदाह वैयासकिरात्मविद्यावि
शारदो नृपतिं साधु पृष्टः २५ इति श्रीभागवते द्वितीयस्कन्धे तृतीयोऽध्यायः ॥३॥ सूत उवाच
वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः। उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् १ आत्मजाया
सुतागारपशुद्रविणबन्धुषु। राज्ये चाविकले नित्यं विरूढां ममतां जहौ २ पप्रच्छ चेममेवार्थं य
न्मां पृच्छथ सत्तमाः। कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ३ संस्थां विज्ञाय संन्यस्य कर्म त्रैव
र्गिकं यत्। वासुदेवे भगवति आत्मभावं दृढं गतः ४ राजोवाच समीचीनं वचो ब्रह्मन्सर्वज्ञ
स्य तवानघ। तमो विशीर्यते मह्यं हरेः कथयतः कथां ५ भूय एव विवित्सामि भगवानात्ममा
यया। यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ६ ॥

शुकस्येति एवंभूतमात्मनस्तत्त्वनिश्चयं यस्मात्तद्वचः उपधार्य श्रुत्वा कृष्णे मतिं सतीमव्यभिचारिणीं व्यधात्। ना
न्यत्रैवंभूतो १ आत्मादिषु एषु वा ममतां जहौ २ इममेवार्थं हरिलीलालक्षणं ३ संस्थां मरणं ज्ञात्वा त्रैवर्गिकं
धर्मार्थकामसाधनं संन्यस्य त्यक्त्वा आत्मभावं परप्रेमाणं भगवति आत्मीयतां प्राप्तः सन् पप्रच्छ महामा
सत्तमाः अज्ञानं नश्यति तव कथयतः समीचीनं ५ पुनश्च वेदितुमिच्छामि दुर्विभाव्यं ब्रह्मादिभिर्वि

श्री
भाग
द्वि टी
१३

भक्तिस्तन्यानो मद्वं साधनं वै फलं दर्शयन्नमति तपस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचाराः य
स्मिन्तदर्पणं विना सुभद्रश्रवस इति सुभद्राणि यशांसि श्रवणादिः प्राधान्यतायन १७ भक्तेः परं श्रेदि
हेतुत्वं दर्शयन्नाह किरातादयो पापीयजातयः अन्ये च ये कर्मतः पापाः पापदशाश्रयाः भागवताः तदाश्रयाः
सन्तः शुध्यन्ति असम्भावनाशंकापरिहाराय प्रभविष्णवे प्रभवनशीलायेति १८ सर्वोपास्यत्वमनेन स्मरन् प्रार्थ
यते स एष आत्मवतामधीश्वराणां आत्मा आत्मवतां यो मनोपास्यस्तु धर्मः त्रयीमयो वेदादिविशेषणैस्तत्तन्मार्गेनो

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः क्षेमं न विंदंति विना यदर्पणं तस्मै सु
भद्रश्रवसे नमो नमः १७ किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकंका यवनाः खसादयः येऽन्ये
च पापा यदपाश्रयाश्रया शुध्यन्ति तस्मै प्रभविष्णवे नमः १८ स एष आत्मात्मवतामधीश्व
रस्त्रयीमयो धर्ममयस्तपोमयः गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां १९
श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापति पतिर्गतिश्चांधकवृष्णिसात्वतां प्र
सीदतां मे भगवान्सतां पतिः २० यदंघ्र्यभिध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्त्वमात्मनः
वदन्ति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां २१ ॥

आस्यते विविदिते गतव्यलीकैर्निष्कपटैर्भक्तैर्वितर्क्यो अत्याश्चर्येणावीतलीयल्लिंगमूर्तिर्यस्य प्रसीदतु
१९ सर्वपालकत्वमनुस्मरन्नाह श्रियः पतिर्गतिश्च सर्वोपास्यत्वकः २० ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्र्य
भि यस्यांघ्र्योरनुध्यानमेव समाधिस्तेन धौतया शोधितया धिया यथारुचं यथा नामानां मनोगुणानि रूपाणि द
भेदैः यद्वा हृदि प्रतिभासयथामतीत्यर्थः २१ श्रीमाद्रव्याय नमः ॥

13

विचित्रफलदातृत्वमनुस्मरन्प्रणमति भूय पुनः पुनर्नमः सतां धर्मवर्तिनां हि वृजिनच्छिदे दुःखहेतुच्छेत्रे असतामधर्मशीला-
नामसंभवाय प्रणुम्नवहेतवे अखिलसत्त्वमूर्तये तत्तद्देवादिरूपाणां तत्पालनाय तत्परये। समग्रसत्त्वमूर्तये इति वा
पुनरपि पूर्ववैज्ञानाभयवैलक्षण्यमाह पारमहंस्य प्रत्यक्निष्ठात्वरूपे आश्रमे व्यवस्थितानां पुंसामनुमृग्यपदाश्र-
यो येन पुनः पुनर्न्यस्यमात्मानं तस्मै दाशुषे दात्रे १३ सात्वतां भक्तानां ऋषभाय पालकाय कुयोगिनां
भक्तिहीनानां विदूरा काष्ठा दिग्यस्य यस्माद्दूरमपीत्यर्थः तदेव दर्शयन् प्रतीतानां वयोनिदोषनाशायाचित्यमैश्व-

भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्त्वमूर्तये पुंसां पुनः पारमहंस्य आश्रमे व्यव-
स्थितानामनुमृग्यदाशुषे १३ नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्त-
साम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः १४ यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं य-
च्छ्रवणं यदर्हणं लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः १५ विचक्षणा यच्च-
रणोपसादनात्संगं व्युदस्योभयतोऽन्तरात्मनः विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे
नमो नमः १६ ॥

र्यमाह निरस्तं साम्यमतिशयश्च येन तादृशेन राधसा ऐश्वर्येण स्वधामनि स्वरूपे ब्रह्मणि रममाणाय १४
सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन्प्रणमति यत्कीर्तनमिति द्वाभ्यां अर्हणं पूजनं सुभद्रं मंगलं श्रवः य-
शो यस्य तस्मै १५ विचक्षणा विवेकिनो यस्य चरणयोरुपसादनादुपासनाद्भजनात् अन्तरात्मनः मनस
उभयत्र इह चामुत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः १६ ॥

पंचमेनारदेनाथपृष्टः स्रष्टृत्वमात्मनः हरेर्लीलाविराट्सृष्टिं कालकर्मादिशक्तिभिः नारदायविरि
ञ्चोवेदगर्भोभ्यधादिति तत्रनारदप्रश्नमाह देवदेवेति हे भूतभावन अतएवसर्वेषां पूर्वजअग्रजादेता
यतः नेनेति ज्ञानं तत्साधनं यत् तद्विजानीहि विशेषेण ज्ञापय तत्रार्थः क एष भूतेनमात्मतत्त्वंनितरां दृश्यते
येनतत् उपलक्षणमेतत् विश्वमेवात्मज्ञानसाधनं अतस्तद्विशेषं पृच्छति यद्रूपं यन्नरूप्यते प्रकाश्य
ते यदधिष्ठानं यदाश्रयं यतः येन सृष्टं यत्संस्थं यस्मिन्लीयते यत्परं यदधीनं यच्चेति यदात्मकं तत्त्वतः स
कारणतो विशेषः तस्य तत्त्वं यथार्थं तत्त्वतो वद २ नजानामीति नवक्तव्यमित्याह सर्वमिति भूतजातंभ

श्रीनारद उवाच देवदेव नमस्तेस्तु भूतभावन पूर्वज तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं
१ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः २ सर्वं ह्येत
द्भवान्वेद भूतभव्यभवत्प्रभुः करामलकवद्विश्वं विज्ञानावसितं तव ३ यद्विज्ञानो यदा
धारो यत्परस्त्वं यदात्मकः एकः सृजति भूतानि भूतैरेवात्ममायया ४ आत्मन्भावयसे तानि
न पराभावयन्स्वयं आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ५ ॥ ॥

व्यंजनिष्यमाणं भवत् जायमानं तेषां प्रभुर्यतः अतः विज्ञानेन ज्ञानेनावसितं निश्चितं ३ आत्मानमिदं आ
दौ न वक्तव्यादेमेव कथयेत्याह यो विज्ञानं यस्य कस्त्वं विज्ञानं इत्यर्थः यदाधारः कस्त्वाश्रयः यत्प
रः यदधीनः यदात्मकः यत्स्वरूपः ४ ममतावेव स्वतंत्रः परमेश्वरः इति बुद्धिः न वत्तपश्चरणेन तु
परशंकया पृच्छामीत्याह सार्धैस्त्रिभिः आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्राप्नुव
न् अक्लमः श्रमरहितः यथोर्णनाभिरात्मनेव वशाक्तिमवष्टभ्य सृजति तद्वत् ५ ॥ रामराम ॥

किंच ब्रह्मकल्पादौ अजस्य हृदि सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सरस्वती तस्य मुखात् किलाश्रु
त्यर्थं तावन्निर्लक्षणानि तिन्नाथलक्षणा निर्गता सा मे ऋषीणां ज्ञानप्रदानाम् ऋषभः श्रेष्ठः ॥२२॥ इदानीं स्ववाच
श्चातुर्जनानां हितैषीभूतानां कर्मणां दिशा भोग्यानि पयति भूतैरिति तिस्रमेव वाचामिथ्रलंकृषीष्ट अलंकरोतु अप
स्वरच मामनेन लंकाराम भवमाशंका तथा तयामित्या माविष्करोति यो महद्भिर्भूतैरिमाः पुराणि
रीराणि सृष्ट्वा अमूषु पुरुषेष्वन्तर्यामितया शेतेऽवतिष्ठते अत्र पुरुषः समस्तो बोधमालायां यतियमात्पुरुषः इति श्रुत

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि । स्वलक्षणा प्रादुरभूत्किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम् ॥२२॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते गुणान्षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे ॥२३॥ नमस्तस्मै भगवते
वासुदेवाय वेधसे । पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥२४॥ एतदेवात्मभू राजन्नारदा
य विपृच्छते । वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः ॥२५॥ इति श्रीभागवते द्वितीयस्कंधे च
तुर्थोऽध्यायः ॥४॥

एवं प्रकारेणेंद्रियपंचभूतरूपान्षोडशगुणान्कल्पान् भुंक्ते प्रकाशयति पालयतीति वा तत्र वासात्मनेप
दमार्षं अत्र हेतुः यतः षोडशात्मकः आत्मनि चेतसि यत्तानार्थकं नन्वजीवत्वमुच्यते प्राधान्याविरोधात् ॥२३॥ श्री
व्यासमनमस्करोति नमस्तस्मै सौम्या भक्ता यस्य मुखांबुरुहे ब्रह्म समवोमकरंदः ॥२४॥ यदात्मप्रश्नमात्ररात्रये
ब्रह्मनारदसंवादं प्रस्तौति एतदिति उत्पत्तिसमये यत्तदेवेदानामर्थं यस्मात्ताद्धरिर्यदाह ॥२५॥ इति श्रीभा
वार्थदीपिकायां द्वितीयस्कंधे चतुर्थोऽध्यायः ॥४॥ ॥

श्री
भाग
द्विटी
१५

ननु हि को मायावी सर्वाश्चर्यमयो यो भवता नमः क्रियते तं वर्णयति त्रिभिः येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि सृष्ट्यादिभिर्व्यक्तं करोमि यथा अर्कादयश्चैतन्यप्रकाशमेव प्रकाशयन्ति तथा च श्रुतिः न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ तस्मै नमो धीमहि यस्य मायया मोहिताः सन्तो युष्मदादयो मां जगद्गुरुं जगत्कर्तारं वदन्ति तस्मै यन्मायया इति मायासम्बन्धात् दुर्जयत्वात् मम तत्सापि किमस्ति सत्तारूपेणैव

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं यथार्कोऽग्निर्यथा सोमो यथर्क्ष्यग्रहतारकाः ॥११
तस्मै नमो भगवते वासुदेवाय धीमहि यन्मायया दुर्जयया मां वदन्ति जगद्गुरुं ।१२ विलज्ज- जं
मानया यस्य स्थातुमीक्षापथेऽमुया विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ।१३
द्रव्यं कर्म च कालश्च स्वभावो जीव एव च वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ।१४ ॥

15

त्वाहं मत्कर्तृ इति न जानातीति ।१२ यस्य दृष्टिपथे स्थातुं विलज्जमानया एवं तस्मिन्नका येऽमकुर्वता अमुया मायया विमोहिता अस्मदादयो दुर्धियः अविद्यावृता नानाएवं केवलं विकत्थन्ते श्लाघन्ते अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति ।१३ तदेव स्वस्मादन्यं परमेश्वरं निरूपयति नान्यो यदधिष्ठानमित्यादि न वयं प्रमाता मत एवाधिष्ठाना दिकं सर्वमित्युक्तं एवं नन्तु व्यतिरेकेणान्यत्सर्वं सन्नेमाह द्रव्यमिति द्रव्यं महाभूतानि उपादानं कर्म पाणिकर्मजन्मनिमित्तं कालस्तत्क्षोभकः स्वभावस्तस्य परिणामहेतुः जीवो भोक्ता वासुदेवान्यतोऽन्योऽर्थो नास्ति कारणं व्यतिरेकात्कार्यस्य ।१४ ॥ ॥ ॥ ॥ राम राम

तस्मात्सर्वेश्वरस्मिन्विश्वस्मिन्परमात्मनि अपरं श्रुधर्मं मममेमध्यमेचतत्रापिनाममनुष्यादिरूपेहिपदिगुणाः
श्लोकादितिभावः सांप्रतं तत्रापिमदस्मत्सूलस्वत्वमेच किंचिदप्यन्यतेनेदं किंतुनत्वेवमर्वेभवतीतिम
न्ये सतच्यानिविधापिभगवानतपाःपरतःतियत्ततेनतोम्याविवेद्यमेमोहयसियत् परापाकाईश्वरात्र
पाकांप्रयच्छसि यथैवाहंतयानुशासितः पीडितःसन्नुद्भ्रुत्ध्येयतत्थाविशेषाणि विज्ञापय ८ पृच्छमा
भिन्नदीति हेवत्सपुत्रत्वंवेदविचिकित्सितमेदेह तस्यैवकः प्रश्नोऽयमगित्यर्थः यतः कामहीकस्यत्तवा

नाहं वेदपरं ह्यस्मिन्नापरं न समं विभो नाम रूपगुणैर्भाव्यं सदसन्मांकिंचिदन्यतः ६ स भवानचरद्घोरं
यत्तपः सुसमाहितः येनाविदाम येन त्वं पराणं काप्रयच्छसि ७ एतन्मे प्रश्नतः सर्वं सर्वज्ञ सकलेश्व
र विजानीहि यथैवेदमहं बुद्ध्येऽनुशासितः ८ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्यैदंवत्सतेविचि
कित्सितं यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ९ नानृतंतववच्चापियथा मां प्रब्रवीषिभोः अविज्ञा
यपरं मत्त एतावत्त्वं यतोहिमे १० राम

एवंप्रश्नः अत्राह तत्र यत्यत् परमधर्मं भगवद्वीर्यप्रकाशनेप्रवर्तितोऽस्मि अतस्तेजिज्ञासयापि मयिहृपा
सेवकृतवानितिनार्थः ९ नन्वनृतमेवभगवान्निर्लक्षो भवन्यापकः सृजसि भूतानीत्यादिनामयैवयस्मात् ईश्व
रत्वेनप्रभावमेतदपितवभाषणानिनान्यतेमहत्त्यतः कामाणान् एतावत्प्रभावस्यभावः एतावत्त्वमेमत्रुक्ति
कितमतः परमीश्वरमविज्ञायत्वभवतः माहप्पन्तवेये भौतिर्भवत्त्वबुद्धिपूर्वमन्नतमित्य
र्थः यत ईश्वरात्मेत्तावत्त्वमविचार्यतिवान्यः १० ॥

श्री
भाग
टि॰टी
१९

तत्र सृष्टिप्रकारमाह कालमिति कर्म जीवादृष्टं विबुभूषुः विविधं भवितुमिच्छन् २१ गुणानां व्यतिकरः
क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपान्तरापत्तिः पुरुषः ईश्वरस्तेनाधिष्ठितात्तत्त्रयाणां विशेषतः २१
महतः महत्तत्त्वात् २२ विकुर्वाणात् विक्रियमाणात् तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेपि रजः स
त्त्वाभ्यामुपबृंहितत्वे अहङ्कारस्यावश्यकत्वात्तमः प्रधानत्वं सृजत्येवाहंकारकार्येषु तामसानामाकाशादि
कानां बहुत्वात् राजससात्त्विकानामल्पत्वात् इन्द्रियाधिदेवेषु जीवेषु पितृत्वेन तामसाधिक्यं २३ स चाविकुर्वन् त्रया
णां गच्छन् त्रैविध्यमेवाह वैकारिकः सात्त्विकः तैजसो राजसो यद्भिदा यस्य भेद २३ द्रव्यशक्तिरित्यादीति

कालं कर्म स्वभावं च मायेशो मायया स्वया आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे २१
कालाद्गुणव्यतिकरः परिणामः स्वभावतः कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् २२ महत
स्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः २२ सोह
ङ्कार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा २३ द्रव्यश
क्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो तामसादपि भूतादेर्विकुर्वाणादभून्नभः २४ तस्य

प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्यं महाभूतानि शक्तिर्येषां क्रियाः इन्द्रियेषु शक्तिर्यस्य ज्ञानेषु
देवेषु शक्तिर्यस्य हे प्रभो वा तेषु शक्तिः भूतादिरिति तामसस्य विशेषणं तत्तामसात्प्रथमं शब्दो भवतीति
प्रसिद्धे सत्यमतः तस्य तमसो मात्रा सूक्ष्मं रूपं गुणः सूक्ष्मत्वात् धारणः आवर्तको धर्मः शब्दः ज्ञानमस्य
तस्य लक्षणं एवमेव स्पर्शादिष्वपि द्रष्टव्यं शब्दस्य लक्षणं लिङ्गमिति कुत्रायं तस्याविनेनकेन विद्र स्तु गजो
गजः इत्युक्ते यो गजः दृष्टा यः श्रुतेन दृश्यो गजः तयोर्लिङ्गं बोधकं लिङ्गं विषयताया च्छन्दस्य घटत्वे २५ ॥

16

तस्यैवं प्रतिष्ठाभ्यो नारायणः परः कारणमेवेति अनेनैव शास्त्रयोनित्वप्रतिपादनेनैक्ये प्रमाणं सर्वतत्त्वा
दिकं चोक्तं देवाश्च तदङ्गाज्जाताः अतो न तद्व्यतिरिक्ता लोकाः स्वर्गादयः तदानन्देषामसत्त्वात् तत्साधनभूताः १५
योगः प्राणायामादिः तपस्तत्साधनं विवेको ज्ञानं तत्साधनं गतिस्तत्फलं अनेनैव सर्वं तदधीनमित्युक्तं १६
तर्हि किं करोमीत्यपेक्षायामाह तस्य सृज्यमपि तत्सृष्टोहं सृजामि इति तयाकटाक्षेणात्महेतवः स्वीकृत्या
दयः १७ तत्तुल्यत्वे यो जीवस्य विभागः यत्तत्त्वैश्वर्यं सर्वेश्वरः स्यादित्यपेक्षायामाह जीवस्य विभागो हेतु

नारायणपरा वेदा देवा नारायणाङ्गजाः नारायणपरा लोका नारायणपरा मखाः १५ नारायण
परो योगो नारायणपरं तपः नारायणपरं ज्ञानं नारायणपरा गतिः १६ तस्यापि द्रष्टुरीशस्य कू
टस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः १७ सत्त्वं रजस्तम इति निर्गु
णस्य गुणास्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभोः १८ कार्यकारणकर्तृत्वे द्रव्यज्ञा
नक्रियाश्रयाः बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः १९ स एष भगवांल्लिङ्गैस्त्रिभिरेभिर
धोक्षजः स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः २० ॥

माह त्रिभिः सत्त्वमिति निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नन्ति मुनेरेणान्वयः कथंभूताः तेनैव सत्त्वा
द्यास्थित्याद्यर्थं मायया गृहीताः १८ बध्नन्ति सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्न
न्ति कार्यमधिभूतं कारणमध्यात्मं कर्तृत्वमधिदैवं तेषां भावः तत्र तस्मिन् द्रव्यं महाभूतानि ज्ञानं गाहे
न्द्रियदेवताः क्रियाः इन्द्रियाणि तदाश्रयाः तेषां कारणाद्भूताः तत्तदभिमानेन बध्नन्ति १९ अतः स एष सा
माय एभिर्गुणैर्जीवानामावरकैरुपाधिभिः सुष्ठु लक्षिता गतिः तत्त्वं यस्य सः स्वभक्तैरेव लक्षिता ।

श्री
भाग
द्वि टी
१२

एवं कारणात्मसृष्टिमुक्त्वा कार्यसृष्टिमाह यदैत इति असंगताः असम्मिलिता आसन् अत एव यतनस्याय-
तनस्य शरीरस्य निर्माणे न शेकुः ३१ सदसत्त्वं प्रधानगुणभावं उपादाय गृहीत्वा उभयं समष्टिव्यष्ट्यात्मकं
शरीरं ३२ कालकर्मस्वभावनधिष्ठाय स्थितः जीवतीति जीवः परमात्मा अजीवं अचेतनं अजीवयत् जीवयति स्म ३३ नि-
र्भिद्य पृथक्कृत्य स्थित इत्यर्थः ३४ तदवयवैर्लोकान् कल्पितानाह कट्यादिभिः जघनं पृष्ठभागः

यदैतेऽसंगता भावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ३१ तदा संहत्य
चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ३२ वर्षपूगसहस्रान्ते
तदण्डमुदकेशयम्। कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ३३ स एव पुरुषस्तस्मादण्डं निर्भि-
द्य निर्गतः। सहस्रोर्वङ्घ्रिबाहूक्षः सहस्राननशीर्षवान् ३४ यस्येहावयवैर्लोकान् कल्पयन्ति
मनीषिणः। कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ३५ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बा-
हवः। ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ३६ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य
नाभितः। हृदा स्वर्लोक उरसा महर्लोको महात्मनः ३७ ग्रीवायां जनलोकोऽस्य तपोलोकः स्तन-
द्वयात्। मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ३८ ॥ ॥ ॥ ॥

अधः सप्त लोकान् अतलादीन् ऊर्ध्वं भूरादीन् सप्त ३५ वर्णानां तत उत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म ब्राह्म-
णास्तद्वन्मितकार्यकारणयोरभेदविवक्षया बहुवचनं तत्र क्षत्रियः ३६ इदानीं मतान्तरेण लोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह द्वाभ्यां भूर्लोकः पातालमारभ्य कटिपर्यन्ताभ्यां पादाभ्यां कल्पितः
उपासनार्थत्वादुपाधिप्राधान्येन विपरीतेनदोषः यदा तत नतपाद ऊर्ध्वं यदा हृदयं तस्मादित्यर्थः ब्रह्म
लोकः वैकुण्ठाख्यः सनातनः नित्यः नतु सृज्यप्रपञ्चान्तर्वर्तीत्यर्थः ३८ ॥

एवम्भसः कारणत्वेनान्वयाच्छब्दवांश्च वायुः तस्य लक्षणं प्राणो देहधारणं ओजः सहो बलानीन्द्रियमनः शरीराणां पाटवानि तेषां हेतुः इत्यर्थः २४ उदपद्यतोत्पन्नं रूपवत्तेजः वायुर्नभसोः कारणभूतयोरन्वयात्स्पर्शशब्दवत् २६ एवमम्भसः घोषः पारः २७ विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यं २८ मनः प्राहेन्दुं तदधिष्ठातारं चेन्द्रोपेन्द्रहर्षाः अन्ये च पञ्च देवा वैकारिकाः सात्त्विका अहंकारकार्याः नानाहि दि

नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं २५ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् २६ तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकं रूपवत्स्पर्शवच्चाम्भो घोषवच्च परान्वयात् २७ विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत् परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः २८ वैकारिकान्मनो जज्ञे देवा वैकारिका दश दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः २९ तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ ३० श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवः ३१ ॥

शश्च वातस्त्वगर्कश्चक्षुः प्रचेता जिह्वाश्विनौ च एते पञ्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्निरिन्द्र उपेन्द्रो मित्रः प्रजापतिः एते पञ्च वाक्पाणिपादपायूपस्थानामधिष्ठातारः ३० एतौ ज्ञानशक्तिः बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्ये अतो ज्ञानक्रियाविशेषरूपाणीन्द्रियाण्यपि तैजसादभवन्नित्यर्थः ३ तान्याह श्रोत्रमिति दोः पाणिः मेढ्रमुपस्थः अङ्घ्रिः पादः सन्निवेशितः ३१ ॥

श्री
भाग.
द्वि टी.
१८

अस्य त्वक् स्पर्शस्य वायोश्च तत्स्थं: सर्वस्य मेधस्य यज्ञस्य उद्भिज्जजातीनां सर्ववृक्षाणां यैर्यतः सम्यक्संभृतस्ते
षामेव वा ४ केशश्मश्रुनखानां तेन पूर्ववत्त्वोक्तिः आस्पदत्वं विघ्नः पादकरनखास्ते शिलालोहानामिति सादृश्या
दुह्यः क्षेमकर्मणां पालनकर्तृणां ५ विक्रमः पदन्यासो भूरादिलोकानामास्पदमाश्रयः भूरादिशब्दानामव्ययत्वा
त् षष्ठ्यलुक् क्षेमालम्बनानां शरणभयात्राणानां सर्वकामानां वरस्य वरणीयस्यापि हरेश्चरणमास्पदं ६ वीर्यस्य

त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः ४ केशश्मश्रुन
खान्यस्य शिलालोहाभ्रविद्युताम् बाहवो लोकपालानां प्रायशः क्षेमकर्मणां ५ विक्रमो भूर्भुवः स्वश्च
क्षेमस्य शरणस्य च सर्वकामवरस्यापि हरेश्चरण आस्पदं ६ अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजाप
तेः पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृते ७ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद हिंसाया निरृते
र्मृत्योर्निरयस्य गुदः स्मृतः ८ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः नाड्यो नदनदीनां तु गोत्राणां
मस्थिसंहतिः ९ अव्यक्तरससिन्धूनां भूतानां निधनस्य च उदरं विदितं पुंसो हृदयं मनसः पदम् १० धर्म
स्य मम तुभ्यं च कुमाराणां भवस्य च विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम् ॥ ॥ ॥ श्रीरामराम

क्रस्य पितृशिश्रोपिहिताने उपस्थस्त्विन्द्रियं प्रजात्यर्थमानन्दः सेत्ता नार्थं संभोगः तेन निर्वृतिः नापहानिः तस्याः ७ परिमो
क्षस्य मलत्यागस्य पायुरिन्द्रियं गुदः स्थानं निरृतेरलक्ष्म्याः ८ तमसो ज्ञानस्य पश्चिमः पृष्ठभागः गोत्राणां गि
रीणां अस्थिसंघातः ९ अव्यक्तप्रधानं रसः अन्नादिसारः सिन्धवः समुद्रास्तेषां निधनस्य लयस्य उदरं पदं स्थानं
विदितं ज्ञातं निमित्तमनसः अस्मदादिलिङ्गस्य शरीरस्य १०
तुभ्यं तव कुमाराणां सनकादीनां भवस्य रुद्रस्य
आत्मा चित्तं परमायनं ॥ ॥

18

इदानीं चतुर्दश लोकान् पततं दर्शयति तत्र जघनादिभिः सप्त ऊर्ध्वं सर्वोज्ञापवमसकवादिभिः अधः सप्त लोका
नाह तलमध्यामिति ह्राभ्यां पुद्दहरिभज्ञानिवामनवाति ३९ ४ त्रिलोकपतमाह भूर्लोकः पातालादिमहिम
४१ इति श्री द्वितीये पंचमः ५ पुरुषविराड्विभूतेश्च श्रोत्रेत्याणात्मादिभेदतः हृष्टीकर्तं च पूर्वोत्तमवं पुरुष
स्तुतः इदानीं विराजस्य विभूतिः सप्रपंचमन्ववर्णते वाचामस्मदादिवागिन्द्रियाणां तदधिष्ठातृवह्नेश्च
स्य सप्तविधेतत्त्वात्तत्त्वस्थानं छन्दसां गायत्र्यादीनां सप्तानां तत्त्वस्य सप्तधातवः वर्गादयः तेन हव्यं देवानामन्नं कव्यं पितॄ
णां यश्चातले ह्यत्र ममकस्या वितलं विभोः जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ३९ महातलं च
गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं पादतलत इति लोकमयः पुमान् ४ भूर्लोकः कल्पितः प
द्भ्यां भुवर्लोकस्य नाभितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ४२ इति श्रीभागवते द्वितीय
स्कन्धे पंचमोऽध्यायः ॥५॥ ब्रह्मोवाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः हव्यकव्यामृतान्ना
नां जिह्वा सर्वरसस्य च १ सर्वासूनां च वायोश्च तन्नासे परमायने अश्विनोरोषधीनां च घ्राणो मोदप्र
मोदयोः २ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः
३ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ४ ॥
णां सम्यक्तत्त्वं भयशोकमद्भयाणां तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य च कारणस्मदादि जिह्वेन्द्रियस्य तत्
दधिष्ठातृवरुणस्य च एतस्य जिह्वा तत्स्थानमित्येवं सर्वत्रानुवर्तनीयं सर्वासूनामस्मदादिप्राणानां त
स्य नासिका नामस्य परमायने अनतः तेजसो दरमोदयोः श्चासामान्यातिपायगंधयोः घ्राणेन्द्रियं परमायनम् २ तेजसा
रूपप्रकाशानां चक्षुरिन्द्रियं रूपाणां नीलपीतादीनां चक्षुषी नेत्रे अनेकसर्वत्र सत्तानां प्रथमा तत्तेजो द्वा
दशो कर्णौ श्रोत्राधिष्ठानां श्रोत्रमिन्द्रियं तस्य गात्रं त्वग्रोमाणि वस्तुसाराणां तेषां भाजनं स्थानं ३ गम

श्री
भाग
द्वि टी
१९

19

ननु प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तन्निरासाय एतावानस्येत्यस्यार्थमाह महिमेति प्रपंचात्मकत्वा-
पि अमृते शान्तमित्येष महिमा दुरत्ययः अपारः प्रपंचात्माभिभूतत्वादिति भावः मंत्रोऽपि एतावानस्य महिमा वि-
भूतिः स च ज्यायान्महत्तरः इति वदतायमेवार्थ उक्तः तदेवमोक्षपर्यन्तं तस्य उक्त्वा तदाश्रितानां बंधमोक्ष-
व्यवस्थयेति दर्शयन् पादोस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति त्रिषु अंशेषु स्थितेन येन भूरादिलोकाः
ते पादाः तेषु पादाः त्रिषु अंशेषु पुंसः स्थितिपादाः स्य पादेषु अंशभूतेषु सर्वान् जीवान् विदुः स एव पादोस्य विश्वा भू-
तानीत्युक्तिः सामानाधिकरण्यमपि अंशांशिनोरभेदविवक्षया पादस्यैकवचनं च सामान्याभिप्रायेणेति व्या-
ख्यातं भवति १७ भूतेषु फलवैचित्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह अमृतं क्षेमम् अभयमेवाधि त्रिपादमृत

महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः १८ अमृतं क्षेममभ-
यं त्रिमूर्ध्नोऽधायि मूर्धसु पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः १९ ॥॥ ॥ ॥॥

नित्यं सुखं दिवि ऊर्ध्वलोकेषु न त्रिलोक्यामित्यर्थः तदेव त्रिपाद् ऊर्ध्वलोके त्रिविधं दर्शयन्नाह त्रयाणां लोकानां मूर्ध्नि
महर्लोकः तस्य मूर्ध्नि जनस्तपःसत्यलोकाः तेषु यथाक्रमम् अमृतादिकं अधायि निहितं तत्र जनलोके क्षेम-
वसंति यावज्जीवं स्वस्थानापरित्यागात् किन्तु महर्लोकवासिनां कल्पान्ते त्रिलोकीदाहोष्मपीडितानां तत्-
स्थानत्यागमनादक्षेमदर्शनम् अस्ति तपोलोके तस्य दाहस्याभावात् क्षेमम् एव वस्तुं हि त्रिलोकीदह्यमानायाशं-
संकर्षणाग्निना यात्युष्मणां महर्लोकाज्जनं भृग्वादयोऽर्दिताः इत्युक्तेः सत्यलोके तु अभयं मोक्षस्तत्र मुक्त्यासतः १८
तदेव वैचित्र्यम् अधिकारभेदेनोपपादयन् त्रिपाद्बहिः इत्यस्यार्थमाह न प्रजायंत इति
पुत्रादिरूपेणोत्पाद्य प्रजाः ते नैष्ठिकब्रह्मचारिवानप्रस्थयतयः तेषामाश्रयाः त्रिलो-
क्या बहिरासन् १९ ॥ ते

एवंतावदस्यमेध्याज्जातंविश्वंततोनभिन्नंयथाकुंडलंसुवर्णान्नपृथक्तत्सर्वंनियंतासर्वप्रकाशकोनित्यमुक्त
इत्यर्थांकुत्रापतिदेवपुरुषस्यज्ञात्वैकपूर्वेननदुष्यति तत्रमहत्स्वपीषैतद्वेचमस्य आत्मत्वाणामस्मावमासीदित्या
दिचत्रयस्त्वाथस्यार्थः पूर्वध्यायप्रदर्शितः पुरुषएवेदंसर्वमित्यर्थंदर्शयति अहंभवानितिसार्द्धैस्त्रिभिः तत्र
अग्रजाःसुममनकादयःमरीच्यादयश्च ११ जलेचस्थलेचनभश्चौकांसियेषांतेजलस्थलनभौकसः इतिमध्या
धः सर्वंपुरुषएवनततः पृथगित्यर्थः १२ प्रपंचेनतस्यापरिच्छेदंवक्तुंमस्मृमिमित्यस्यार्थमाह तेनपुरुषेण
विश्वमितिभूमिपदस्यार्थः वितस्तिमितिदशांगुलपदस्यार्थः तथापितदाह्यसमस्तंचवितस्तिमधिकंव्याप्यतिष्ठ

अहंभवान्भवश्चैवतइमेमुनयोऽग्रजाः सुरासुरनरानागाःखगामृगसरीसृपाः ११ गंधर्वाप्सरसो
यक्षारक्षोभूतगणोरगाः पशवःपितरःसिद्धाःविद्याध्राश्चारणाद्रुमाः १२ अन्येचविविधाजीवाजल
स्थलनभौकसः ग्रहर्क्षकेतवस्तारास्तडितःस्तनयित्नवः १३ सर्वंपुरुषएवेदंभूतंभव्यंभवच्चयत्
तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति १४ स्वधिष्ण्यंप्रतपन्प्राणोबहिश्चप्रतपत्यसौ एवंविराजंप्र
तपंस्तपत्यंतर्बहिःपुमान् सोऽमृतस्याभयस्येशोमर्त्यमन्नंयदत्यगात् १६ ॥

ति आधिक्यमात्रेविवक्षितेनप्रमाणेनअनुपयोगात्परिच्छिन्नत्वाद्यपत्तमहत्त्वंतमाह यथेति असौप्राणार्क
इत्यः असौवादित्यःप्राणाइतिश्रुतेःस्वधिष्ण्यंमंडलंप्रकाशयन् यथाबहिश्चप्रकाशयतितथाविराड्देहंप्र
काशयन्पुरुषोऽन्तर्बहिश्चप्रकाशयति १५ नित्यमुक्तत्वंदर्शयितुंतत्रामृतत्वस्यतस्यार्थमाह सइति
अभयेतिमोक्षस्तन्नामृतपदव्याख्या अन्नमितिपादविभक्तिव्यत्ययेनअत्राचष्टमर्त्यंमरणधर्मकमन्नंकर्म
फलंयस्मादत्यगात् अतिक्रांतवान् अतोनकेवलंसर्वात्मकःकिंतुमुक्तस्यापीश्वरइत्यर्थः १६ ॥

श्री
भा टि
टी २

20

चातुर्होत्रं श्राद्धिकं कर्म नामसमीपेयानि ध्येयानि सोमादीनि स्नात्वाचान्त मेध्याः तिथ्यादयः १४ देवतानामनु
क्रमः उद्देश्यः कल्पो बौधायनादिकर्मपद्धतिग्रन्थः संकल्पो हं यक्ष्य इति मनःसंकल्पः तन्त्रमनुष्ठानतन्त्रं क्रमः गतयो विष्णुक्रमाः
माघाः तत्तद्देवतापात्नादीनि तस्य आगमानुगतिं अमम प्रणम्य तां समाहितोऽसम्भावयन् १५ मा हि तेन वयं तेन वयं तेन
तेन मयजन्ति मखांश्च स्वाविततं तेन देवा अयजन्त तमहं मात्मप्रपञ्चरूपं यजेत तत इति सम्भाव्य कृत्स्नादिदृष्ट्या अयजन्त
यतस्तं तेन पुरुषमात्मसंस्तुतं यं तमपादये दर्पितः २३ कालेन वा वयं २८ यदपि प्राप्तामित्येतत्तस्मान्नारायणरूपमेव इति
नारायणे इति आहितमपि तमभगवन्तं तेन यज्ञेन सत्त्वगुणा सर्वात्मग्रहीतमायया यस्याऽवग्रायणत्त्वमिन् २९ यत्परा
यज्ञो यत्रेषिमामानि चातुर्होत्रमनम लामपयानि मत्राश्चैतानि गुणानां तानि च १४ देवतानुक्रमः क
ल्पः संकल्पस्तन्त्रमेव च गतयो मतयश्चैव प्रायश्चित्तं समर्पणम् २५ पुरुषावयवैरेते सम्भाराः सम्भृता मया
इति सम्भृतसम्भारः पुरुषावयवैरहं तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् २६ ततस्तेभ्रातरस्ते प्रजानां
पतयो नव अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः २७ ततश्च मनवः काले ईजिरे ऋषयोऽपरे पितृ
विबुधदैत्यामनुष्याः क्रतुभिर्विभुम् २८ नारायणे भगवति तदिदं विश्वमाहितं गृहीतमायोरुगुणः स
र्गादावगुणः स्वतः २९ सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ३०
इति तेऽभिहितं तात यथेदमनुपृच्छसि नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् न भारती मेऽङ्ग मृषोपलक्ष्यते न
कामि मे न तत्र स्मृतानि यद्धृतमेषमभगवानसर्वेषां सचेतसः इति तद्रूपमहं हरति हृज्जामीति पालनेन स्वयमेव करोतीत्याह
विश्वमिति पुरुषरूपेणाविष्णुरूपेण त्रिशक्तिर्मायाऽनादि धारतीत्यादिम ३ यद्वेदेविश्वयदात्मकं त्वमित्येवमादि
सर्वप्रश्नानां सामान्योत्तरं यदृतं वासुदेवात्परोऽस्मान्न तत्त्वान्तरोपलब्धिरिति तत इति पुरुषपदेन सर्वमिति प्रश्नावाचयत्
द्वीक नेतद्रूपमहं हरतीत्युतीतिकार्यकार्यकारणात्मकं भावमसत्यभगवतः सकाशादन्यदस्ति न भवतीति हि
३१ यदुक्तं परतावद्यतो हि मत्तमविनायमामी श्वरं प्रजवीषितदुक्तं परमोपममहत्तिनभारती तियच्च स्थानेऽमया
त्रैविध्यमनृतमुक्तं तद्धि तेन हृदा हृदि धृतं यावत् अगहिनारद ततः सर्वामनदिग्याऽऽहृत्य मयानाधो न

गृहमेधस्त्वेत् यस्माद्बृहद्व्रतः ब्रह्मचर्यव्रतस्थित अयं चापि कालभेदेनैकस्यैवावस्थाभेदेनेति तत्त्वं तत्र भिन्ना विषयसृतिं दर्शयन् ततोऽपि विष्णुः त्यक्ष्यार्थमाह विविधमुपभुज्यते इति विष्वङ् पुरुषः देवयानपितृयानमार्गौ दक्षि णोत्तरौ विचक्रमे चलति स्म कथंभूते साशनानशने भोगापवर्गप्राप्तिसाधने भुक्तेश्च देवत्वेन पुनर्विशेषो
१९ यतः यदविद्यावत्तत्साधनोपासनं स्यात्तद्देवविराडिति तत्रैव तिलोपफलवैचित्र्यमत्रोक्तमकरोत्सर्वात्मा वैलक्षण्यं दर्शयितुं तस्माद्विराडुत्पत्तेः त्वस्यार्थमाह यस्मादण्डं जज्ञे तत्र च भूतेन्द्रियगुणात्मको विराड् च जज्ञे महेश्वरः ॥ तर्हि सर्वविराड्देहमिदं मण्डलमतिक्रान्तवानस्य यः स्वेति सर्वोक्तपक्षं प्रत्तं नेनैव प्रजपवेचा

अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः। सृती विचक्रमे विष्वक्साशनानशने उभे १९ यदविद्या च
विद्या च पुरुषस्तूभयाश्रयः। यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः २० तद्द्रव्यमत्यगाद्विश्वं गोभिः
सूर्य इवातपन् यदास्य नाभ्यान्नलिनादहमासं महात्मनः २१ नाविदं यज्ञसम्भारान्पुरुषावयवादृते
तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः २२ इदं च देवयजनं कालश्चोरुगुणान्वितः वस्तून्योषध
यः स्नेहा रसलोहमृदो जलम् २३ ॥

सर्वं तद्यज्ञस्य तत्साधनानां च सृष्टिक --- यैः प्रतिपाद्य धनं मि[illegible] त्यादिरूपाकारं तत्र पिहिताः ययाययास्य षाण्विषयादिसन्धार्थं संसृष्टिं दर्शयति यदेत्यादिना यस्येति विराट् तत्त्वं भिन्नस्यैव प्रभावात् नाभेर्भवा नाभ्यं तस्मात् २१ यज्ञसम्भारान्साधनानि नाविदं पुरुषावयवादृते तेषु संभारेषु साधयेत् पुरुषावयवैरेव संभारः तेषु नाहमिति चतुर्थेनान्वयः वनस्पतयो यूपाः २२ देवयजनं यज्ञभूमिः इदमत्र स्थाने उपविष्टः कल्पयतीति मात्वबहुगुणान्वितो वसन्तादिकालः वस्तूनि चरुपचनादीनि पात्राणि कोद्रवादीनि ओषधयो व्रीह्यादयः स्नेहा घृतादि

श्री
भा टी
२१

नयोर्विहितत्तन्नेनमुज्ञां किंपुनरन्येभिरित्यपेक्षायामाह. प्रत्येतानं केवलमत्यन्तं ज्ञानं ज्ञेयाकाररहितं तत्त्वानुव्यवच्छेदार्थं विशे
षणानि विशुद्धं विषयाकारशून्यं यतः प्रत्यक् सर्वान्तरं अतएव सम्यक् मे देहादिरहितं अवस्थितं स्थितं यतो निर्गुण
मकारं क्षिगुणाव्यतिकराच्चलं भवति यद्यपि ईदृशं ज्ञानं तथापि स्वरूपज्ञानमेवेति न चाचल्यादिदोषयुक्तं तथापि तः
कारणं निर्दोषत्वात् तथा भवतीति व्यवच्छिद्यते एवं पर्यायैर्विशेषणैः सत्यं च मायामर्मो यं किं च यद्यद्विकार
त्वं सत्यं पूर्णं चानाद्यनन्तमाद्यन्तरहितः षड्विकाराः संतीत्याह अनाद्यन्तं जन्मनाशरहितं अत एव जन्मानन्तरास्तित्वप
लत्वाणि विकारोनास्ति ह्रासवृद्धिपरिणामापक्षयाश्च नसंति यतः पूर्णं सर्वदेहतः नित्यं सद्यनित्यं सर्वदा हेतुप्र
तीतिसमवायोपिपरमार्थतोऽद्वयमिति ३८ अत्रविद्वदनुभवं प्रमाणयति हे ऋषे नारद प्रशान्तान्यात्मेन्द्रियाशया मन
देहेन्द्रियमनांसि यद्या भवति तत्तदा विदंति अन्यथा तत्स्वज्ञाने कारणमाह यदा तदेव प्रकाशमानमेवमसत्तर्कै

र्विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ३९ ऋषे विदंति मुनयः
प्रशान्तात्मेन्द्रियाशयाः यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ४० आद्योऽवतारः पुरुषः परस्य काल
स्वभावः सदसन्मनश्च द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ४१ अहं भवो यज्ञ
इमे प्रजेशा दक्षादयो ये भवदादयश्च स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ४

विप्लुतं स्यात्तदा तिरोधीयेतेति ४० अवताराविभूतीश्चाह आद्य इत्यादियावत्समाप्तिपर्यन्तम् आद्योऽवतारः पुरुषः प्रकृतिप्र
वर्तकः यस्य श्रीमहापुरुषस्य सहस्रशीर्षेत्याद्युक्तलीलाविग्रहः स आद्योऽवतारः वर्तितो हि भूतैर्यदाप
चभिगानमहे परविग्रहविरचितस्मिन्स्थापनविष्णुः पुरुषाभिधानमवापत्तदा याद्याव इत्यर्थः यथाहु
विष्णोस्त्रीणि रूपाणि पुरुषाख्यान्यथोविदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् तृतीयं सर्वभूतस्थं तानि
ज्ञात्वा विमुच्यत इति यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालस्वभावसदसदादीनां कार्य
कारणात्मिकाप्रकृतिस्वरूपतास्वपाकृतयः मनाश्चादीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतय इति वि
वेकः तत्र मनो नाम महत्तत्त्वं महाभूतानि क्रमात्रन्नविवर्तितः विकारोऽहंकारः गुणाः सत्त्वादयः विराट् समष्टिशरीरं स्वरा
ट् वैराजः स्थास्नु चरिष्णु च स्थावरं जंगमं च व्यष्टिशरीरं ४१ इमे भवदादयः सप्रजेशाः तललोकपालाः पातालाद्यधिप

॥ २ ॥ स्कं

अथ स्वानुभवमेवान्वयव्यतिरेकाभ्यां मोहं ममाम्नायादिभिः सर्वोत्कृष्टोपि योगमाश्रित्यापि यत आत्मनो म
म संभवो जन्म तमेव न ज्ञातवान् ॐ तामस्य भवान्तता पतत्स्वार्ततीयस्केधेवत्पत्तिपस्मोस्केवे ३३ तदीसमीयु
षां प्राप्तानां भवच्छिदं संसारनिवर्तकं मंगलाचरणमेव चतस्य प्राप्तं ततोस्मि ततो चित्तामहिमानं न ज्ञातवानस्मी
ति किमुत्तमन्यायेनाह यो ह्यात्ममायाविभवं स्वमायया विस्तारं यमस्य मायापि समग्रं नात् परिच्छेदो निषेधपत्ता वा नितिनतातवा
नित्यर्थः अपरे कुतो ज्ञानीयो तमस्य श्रीमत्पुरुषचरणानतोस्मीति पूर्वेणान्वयः ननु सर्वज्ञः कथं न जानाति
अनन्तभावादिति दृष्टान्तेनाह यथा नभः स्वान्तं न भान ज्ञानाति नहि विद्यमानस्याने सर्वज्ञत्वं विहन्तीति भावः ।

सोहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः आस्थाय योगं निपुणं समाहितस्त
न्नाध्यगच्छं यत आत्मसंभवः ३३ नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलम्
यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वान्तमथापरे कुतः ३४ नाहं न यूयं यदृतां गतिं
विदुर्न वामदेवः किमुतापरे सुराः तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विच
क्ष्महे ३५ यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः न यं विदन्ति तत्त्वेन तस्मै भगवते नमः ३६
स एषः पुरुषः आद्यः कल्पे कल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानं स संयच्छति पाति च ३७

तथा च व्युत्पत्तिपूर्वतयापि वतेव धयुतं तमनेज्ञयात्वमपि यदंततगाणं नितयानन्त ---- गीत्यादिश्लोकाति
शयो मायापतयः पुरुमव्या मन्मांगा वेदयादिवान विदुरिति ३४ यतत्सपश्यति नाहमिति द्वाभ्यां वामदे
वो रुद्रः यस्य श्रीविष्णोः ऋतां गतिं परमा स्वरूपं किंचिदपि रूपं तस्य मायाविनिर्मितं विचक्ष्महे विमृ
तदस्मात्मस्वसज्ञानानुरूपमेव न तत्त्वमोहितबुद्धयस्त्विदं तस्य प्रपंचज्ञानं च हेतुः ३५ ननु सर्वेपि
नत्वा यतोस्य तत्त्वं तथाहं यस्येति ३६ अवतारकर्माणि स्तुवन्तो गायन्ति स एव यस्य श्रीभगवान् सकल अवतारमन
कृष्णादि करोति आत्मात्मन्यात्मनात्मानमिति कर्तापि करणमाधारं कर्म च स एवेत्यर्थः पुरुषावतारः सृष्ट्वा

श्री
भाग
द्वि टी
२२

यज्ञावतारमाह रुचेः प्रजापतेः सकाशात्तद्भार्यायामाकूतौ सुतः सुयज्ञो नाम सन् जातः सच स्वभार्यायां दक्षिणायां सुयमा
न्देवानजनयत् सुपर्वैः सन् यदा आर्तिमहरत् तदा सर्वैस्तत्सुयज्ञोऽपि सन् स्वयमिन्द्रोऽपि सन् पश्चात् मनुना मातामहेन हरिरिति
नाम्ना अनेन देवोत्पादनेन लोकत्रयार्तिहरणेन चेतस्य कर्मदर्शितं एवं सर्वेऽप्यवताराः तत्तत्कर्मानुसारेण ज्ञेय २ कपिलावतारमाह कर्द
मप्रजापतेर्गृहे तद्भार्यायां देवहूत्यां जज्ञे नवभिः स्त्रीभिर्भगिनीभिः सह स च स्वमात्रे आत्मगतिं ब्रह्मविद्यामुक्तवान् ययात्म
न्यामस्या आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकमस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप सती ३ दत्तात्रे
यावतारमाह मया ह्यहमेव तुभ्यं दत्त इति यद्यतस्तस्माद्धेतोः सन्नामा दत्तो जातः स्वभक्तेभ्यो योगैश्वर्यदानेन तच्चरितं दर्शयति

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां लोकत्रयस्य महतीमहरद्यदार्तिं स्वायंभु
वेन मनुना हरिरित्यनूक्तः २ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊचे ययात्म
शमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ३ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमि
ति यद्भगवान्स दत्तः यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ४ तप्तं तपो विवि
धलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्ज
गाद मुनयो यदचक्षतात्मन् ५ ॥

ति यस्य पादपंकजयोः परागाः तैः पवित्रा देहा येषां ते उभयीं ऐहिकीमामुष्मिकीं च भुक्तिमुक्तिरूपां च ४ कुमारा
वतारमाह मे मम आदौ यत्तपः तप्तं तस्मात्स्वतपसः सन्नुपमाहेतोः स हरिश्चतुःसनोऽभूत् सनत्कुमारः सनकः स
नन्दनः सनातन इति चत्वारः सनपाहानाम्नि यस्य सः कथंभूतान्नवतपसः सनात् आविर्भावात् यद्वा स्वतपसः सना
तन सर्वगुणादित्यर्थः घटनेन स च पूर्वकल्पसंप्लवे प्रलये विनष्टं उत्सन्नं संप्रदायात्मतत्त्वं इहास्मिन्कल्पे सम्य
ग्जगाद उक्तवान् सम्यक्त्वं दर्शयति यद्दृष्टमात्रमेव मुनयः आत्मन् मनसि अचक्षत साक्षादपश्यन् ५ ॥

22

गंधर्वादीनामीशाः यक्षादीनांनाथाः रक्षोयोनिमध्यवर्तिः ऋषीणांपितॄणांचश्रेष्ठाः प्रेतादीनामधीशाः ५२ किं
बहुनायत्किंचिद्भगवदादितत्सर्वंपरमेवतत्त्वम् भगवत्पैश्वर्ययुक्तं महस्वत्तेजोयुक्तं ओजः सहस्वदिंद्रियमनः
प्राणशक्तियुक्तंबलवद्धार्ययुक्तंशोभाह्रीरकर्मजुगुप्साविभूतिः संपत्तिः आत्माबुद्धिः तद्युक्तं अर्णोवर्णः अद्भुतार्णमा
श्चर्यवर्णमित्यर्थः रूपमेवस्वरूपंरूपवत्स्वरूपंचयत् तत्सर्वंपरंतत्त्वंपरात्परंविभूतिरित्यर्थः ५३ पुरुषस्यावता
रान्वक्तुमाह प्राधान्यतइति आमनंतिकथयंति श्रवणयोः कर्णयोः कषायामलाः तान्शोषयंतीतितथातान् सुपेशान्

गंधर्वविद्याधरचारणेशायेयक्षरक्षोरगनागनाथाः येवाऋषीणामृषभाःपितॄणांदैत्येंद्रसिद्धेश्वरदानवें
द्राः अन्येचयेप्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः ५२ यत्किंचलोकेभगवन्महस्वदोजः
सहस्वद्बलवत्क्षमावत् श्रीह्रीविभूत्यात्मवदद्भुतार्णंतत्त्वंपरंरूपवदस्वरूपं ५३ प्राधान्यतोयानृषआ
मनंतिलीलावतारान्पुरुषस्यभूम्नः आपीयतांकर्णकषायशोषाननुक्रमिष्येतइमान्सुपेशान् ५४
इतिश्रीभागवतेद्वितीयस्कंधेषष्ठोऽध्यायः ॥६॥ ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणायबिभ्रत्क्रौडीं
तनुंसकलयज्ञमयीमनंतः अंतर्महार्णवउपागतमादिदैत्यंतंदंष्ट्रयाद्रिमिववज्रधरोददार १

सुपेशान् सकारलोपश्छांदसः हे ऋषे तेतत्र भगवन्नुक्रमिष्ये तदनुक्रमणामृतंत्वयापीयतामित्यर्थः यद्वा
आपीयतामिति षोत्वेनं आपिबत कर्णकषायशोषानित्यर्थः ५४ इतिश्रीभागवतदीपिकायांद्वितीयस्कंधे
षष्ठोऽध्यायः ॥६॥ सप्तमेभगवल्लीलावताराब्रह्मणोदिताः नारदायतत्कर्मप्रयोजनगुणाः सह यत्रयदाक्षि
तितलोद्धरणार्थंवाराहींतनुंबिभ्रत्सन् उद्यतोऽनंतः तदातंमहदसिद्दैत्यंहिरण्याक्षंदंष्ट्रयाददार १ ॥

पृथ्वावतारमाह यद्वेनमिति वेनं नाम राजानं अनर्थपीं नरकपुत्र इति पद्भ्यां नामलेभे पुत्रनाम्नो नरका
द्यस्मात् त्रायते स पुत्रः नरकात्त्राता इति श्रुतेः स्वयमेव स्वयंभुवेति हि पुत्रपदं प्राप्तवान् कथं नाति
ज्ञानोपायभावेनैव ... विप्लुष्टं ... पौरुषं भगं ऐश्वर्यं च यस्य तं ... चाह येन ... जगति
...वसूनि ... ९ ऋषभावतारमाह नाभेरिति नाभेर्नाम्नो मेरुदेव्यां ... सुदेव्याः सून
राम नाभेर्भार्या यामेरुदेव्या एव सुदेवी ... जडयोगेन ... समाधिना योगचर्यां याम
तियां तदाह यत् ... परमहंसपदं ... स्वस्थः ... यतः शान्तेन्द्रियः ... यतः ... परिमुक्तसङ्गः

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तं त्रात्वार्थितो जगति पुत्रपदं च लेभे
दुग्धा वसूनि वसुधा सकलानि येन ९ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोग
चर्यां यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः १० सत्रे ममास भगवान्ह
यशीर्षनामा साक्षात्स यज्ञपुरुषस्तपनीयवर्णः छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरु
शतीः श्वसतोऽस्य नस्तः ११ मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः
विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् १२ ॥

संग. ११ हयग्रीवावतारमाह सत्रे इति ... स एव साक्षाद्भगवान् मम सत्रे ... हयशीर्षो
नाम तपनीयवर्णः ... छन्दोमयः वेदमयः ... यज्ञमयः ... तस्य ... नासिकातः ... मा
खिलदेवतात्मा ... वाचः ... उशतीः कमनीया
वेदलक्षणा वाचो बभूवुः ११ मत्स्यावतारमाह मत्स्य इति ... मनुना ... क्षोणीमयः ... प्रथा
ना ... निखिलजीवनिकायानामाश्रयः मम मुखाद्विस्रंसितान् ... वेदमार्गान् ...

नारायणावतारमाह धर्मस्य पत्नी दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नरश्च तिमूर्तिद्वयेन जातः का
र्यमत ऋषि श्रेष्ठौ धारणा तपः प्रभावो यस्मात्तदेवाह अनेनास्य कृतनारायणेनात्मनः सकाशात् आत्मनः स्वप्रीत
रूपा उर्वशी गणाः स्त्रीहेतुतत्र नियमावलोपस्तत्र भोगान् दर्शयित्वा न पोक्तः यद्वा आत्मनः स्वस्य पानियमः तपो
नाशनं तपः तस्मावलोपतं वहन्नामभगवतस्तेचर्यायित्वा न पोक्तः इति पत्नीनाम्नामेकाद्शे भविष्यति ६ यत्र
कामविजयि क्रोधोपविभेतित्तवकामेन प्रभवतीति किं वक्तव्यमित्याह काममिति कालेन स्त्रीहस्य वा
रोषयुक्ताया हस्या कामदह इति रोषं तथा स्वानं दहन्तमपि तेन दहेति क्रोधेनाभिभूयेत् स्वयं नत्वग्रहासोय
धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशान्तः । दृष्ट्वात्मनो भगवतो नियमाव
लोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ६ कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमुत ते न द
हन्त्यसह्यम् सोऽयं यदन्तरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ७ विद्ध म
पत्युदितप्रतिभिर्मृतिराज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि तस्मा अदाद्ध्रुवगतिं गृणते प्रस
न्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ८ ॥

रोषः यदन्तरं यन्मनः प्रविशन्विभेति प्रबोधचन्द्रोदये रोषोक्तिः श्रोधी कोपं मिभव नव पिशीकोपं मिथं संस्थे
तनमध्ये तमतानपामि हत्यनेनपणतिन चात्महितेश्वराणां तिष्ठीमान्धीतमपि न प्रतिसं दधाति यत्राय
स्यान्तः मनः कथं भूतं भवलेनिर्मलं प्रविशन्निति ७ चरित्रेऽपि वक्तव्यमपि ध्रुवतारं सूचयति मातुः सपत्न्या
उदितानि उक्तानि वाक्यान्येव पत्रिणो बाणा तैर्विद्धो ध्रुवः तत्र ज्ञानपदं सूचयति समीपितपदं ततपदस्त्वं ध्रुव
गतिं ध्रुवपदं यस्योपरि स्थितस्तस्य धस्तात् स्थिताः दिविभवा दिव्याः सप्तर्षयः स्तुवन्ति यद्वा उपरिभूम्वादि

प॰ श्रुतिसारसमुच्चये ५ ॥

श्री
भाग
द्वि
२५

24

वामनावतारमाह अदितेस्सुतानां द्वादशादित्यानां मध्येऽधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गु
णैर्ज्यायान् श्रेष्ठः गुणानेवाह यद्यतः इमाँल्लोकान्विचक्रमे पादन्यासैः क्रान्तवान् अथ प्रतिश्रुतानन्तरमेव त
स्हृत् बलेस्सकाशाद्वामनरूपाज्जगृहे ननीश्वरः स्वयं किमिति तथा चक्रे तत्राह याच्ञां विना धर्ममार्गवर्तिभि
र्नैन चाल्याः पश्चात् याच्ञाऽभ्यर्थनीयः इति १७ ननु तर्हि याच्ञया पि चालनमनुचितमेव स्याधीकारे ततोपि वैमस्या
लोकानां दित्याम्यामीत्याशयेनाह न तवालिनाहनार्थः इति यदि त्रैलोक्याधिपत्यं तदानीं बलेर्भाग्यं ग्रीवोदीयमाना
चत्रयबलेः स्वकर्षयोऽनभवति अतः तत्राह अयमपरित्यागरहितः उरुक्रमस्य पादशौचं गङ्गातोऽल

ज्यायान्गुणैरवरजोऽप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः । क्ष्मां वामनेन जगृहे त्रि
पदच्छलेन याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः १७ नार्थो बलेरयमुरुक्रमपादशौचमापः शि
खाधृतवतो विबुधाधिपत्यम् यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग मनसा हरयेऽ
भिमेने १८ तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधुपरितुष्ट उवाच योगं ज्ञानं च भागवत
मात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव १९ ॥

ननु पापस्य आत्मदत्तोऽधृतवतः शिखया धृतवतो योऽयमभीष्टार्थः किं वस्तुक्रेणावाप्तिः यो मोऽपि श्रेयाहे
नादप्रतिश्रुतं विना अन्यत्तन्न चिकीर्षत् कर्तुं नैच्छत् यत् तृतीय पादस्थाने हरये आत्मानं देहमा
पिशोऽभिमन श्रीकृतवान् एवमदृश्ये लोकाश्चर्ये यादृशो वत्ता विबुधाधिपत्यमेष्ट्यानभवतीत्यर्थः १८
हंसावतारमाह तुभ्यमिति भृशं विवृद्धेन भावेन प्रसादेन याभक्त्या परितुष्टः सन् भक्तियोगं सा
धुयथा तथा उवाच ज्ञानं चेति ज्ञानं साधनेऽकितं भागवतं नाम कथंभूतं तत्त्वमेव मतत्त्व आत्मत
त्त्वदीपकं विवृद्धभावेनेति विषयाणां फलमाह यदिति १९ २ ॥

कूर्मावतारमाह क्षीरोदधौ कच्छपवपुः सन् गोत्रं मंथनार्थं मंदरगिरिं पृष्ठेन विधृतवान् कदाचित्तलस्य
यैतीराद्विमग्नमथनाद्भिद्रायाः तथाः श्रवणमर्कुतमवोचायस्मम् अदेः यमिवर्ताः पीधम् मपवककषाणाः
कषाणाज्ञर्षणामवेपदेशयस्माभाकेयंयस्मम् यद्वाग्रदिपीवितपवककषः कषनंतेनश्रनतिश्रपयातीतिकष
णाकेत्यस्य १३ श्रीनृसिंहावतारमाह त्रैविष्टपादेवाः तेषामभयंहत्तीतितथामभगवानकंथम्भतग्रम

तीरोदधावसरदानवश्रूयपालामन्नमन्तामनहतलवयस्यादिदेवः पृष्ठेनकच्छपवपुर्विदधार
गोत्रंनिद्राणतो विपरिवर्तकषाणाकेयुः त्रैविष्टपोनभयहामनृसिंहरूपंकृत्वाश्रमकृत्रदिदंष्ट्रक
रालवक्त्रं दैत्येन्द्रमाशुगदयाभिपतंतमाराद्भोविपात्यविददारनखैःस्फुरंतम् १४ अतःसमस्तुकव
लेनपदंशृहीतोग्राहेणायूथपतिर्बुजहस्तमार्तः आहेदमादिपुरुषाखिललोकनाथतीर्थः
श्रवःश्रवणमंगलनामधेय १५ श्रुत्वाहरिस्तमरणार्थिनमप्रमेयश्चक्रायुधःपतगराजभुजाः
धिरूढः चक्रेणनक्रवदनंविनिपाद्यतस्माद्धस्तेपगृह्यभगवान्कृपयोज्जहार १६ ॥

ज्यायान्गुणैरवरजोप्यदितेःसुतानां लोकान्विचक्रमइमान्यदथाधियज्ञः क्ष्मांवामनेनजगृहेत्रिपदच्छलेन याच्ञामृतेपथिचरन्प्रभुभिर्नचाल्यः १७ नार्थोबलेरयमुरुक्रमपादशौचमापःशिखाधृतवतोविबुधाधिपत्यं योवैप्रतिश्रुतमृतेनचिकीर्षदन्यदात्मानमंगमनसाहरयेभिमेने १८ लोकपोषाजगतामुत्सन्नानतेन्द्रियाविताते

...

राम ४८ ॥

श्री
भाग
टी
२५

25

यस्मै रामाय उदधिर्मार्गं ददौ सपदि पदि शीघ्रं हरस्येव यथारिपुरं दिधक्षतः तदा तत्र अरिपुरं लङ्कां दग्धुमिच्छोः सुहृद्वत
योर्थे यत्र महापञ्चमी यदि दधिवृत्ताः ग्रामात् यस्य यत्र अप्राप्ते तेनागे केपाय स्थितिका यम्भूतउदधिः इन्द्रप्राप्तं यस्य यतो नक्रोध
वेपः केपायमस्य अत्र हेतुः दूरे दूरस्थितमानात् हृत् उन्मीलनात् यानि भिन्नम्भूतयाम स्थितः तस्मितो रोषः तेन सुशोणा अत्यन्ता
रुणा दृष्टिः तया अत्यन्तं तप्यमाने मकरा उरगा नक्रा ग्राहचक्रे यस्मिन् २३ किंच वक्षःस्थलस्पर्शेन रुग्णाः भग्ना
महेन्द्रवाहस्यैरावतस्य दन्ता तैर्विडम्बिता स्वधवलिमाधवलीकृता तत्र दिक्पतिते प्रकाशिता इत्यर्थः याएवम्भूता
ककुभो दिशः ताः जुषते सेवते पालयतीति तथा तस्य दारहर्तुः रावणस्य ऊढहासम् कोयोस्मीति महागर्वेण जृम्भमहा
सं असुभिः प्राणैः सह सद्य एव विनेष्यति प्रापयिष्यति केषाम् धनुषो विस्फूर्जितैः टङ्कारघोषैरेव कथंभूतस्यापि सैन्यस्य मध्ये
न्यमध्ये उच्चरतः उत्कर्षेण विचरतः ककुब्जुष ऊढहासमिति पाठे इतस्ततश्चलिताः ककुभां जयन्तः योह ऊढहासं सेनाति
गर्वात् तम् प्रापयिष्यतीत्यर्थः २४ श्रीकृष्णावतारमाह भूमेरिति त्रिभिः सुरेतराः असुरप्राया नृपाः तेषां वरूथैः सैन्यैर्वि

यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः दूरे सुहृन्मथितरोषसुशोणदृष्ट्या तातप्य
मानमकरोरगनक्रचक्रः २४ वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुष ऊढहासम् सद्योऽसुभिः स
ह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये २५ भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय क
लया सितकृष्णकेशः जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि २६ ॥

मर्दितायाः भाराक्रान्तायाः क्लेशव्ययाय कलया रामेण सह जातः सितकृष्णकेशो जातः सितकृष्णौ केशौ यस्य सम्पूर्णमाता सितकृष्ण
केशांशस्यैव मन्तव्यः परिणामरूपकर्माविकारित्वात् यत्तु श्रीविष्णुपुराणे उज्जहारात्मनः केशौ सित
कृष्णौ महाबल इति यच्च भारते सचापि केशौ हरिरुज्जहार एकं शुक्लमपरं चापि कृष्णं तौ चापि केशावाविशेतां
यदूनां कुले स्त्रियौ रोहिणीं देवकीं च तयोरेको बलभद्रो बभूव योऽसौ श्वेतः तस्य देवस्य केशः कृष्णो द्वितीयः केशव
एवमेव केशावतार इति शङ्कनीयम् इति तत्तु न केशमात्रावतारभिप्रायं किन्तु भारावतारणरूपं कार्यं कियदेतत् प
रमेश्वरस्य केशेनैव कर्तुं शक्यमिति द्योतनार्थं श्रीरामकृष्णयोर्वर्णसूचनार्थं केशोद्धरणमिति गम्यते

[illegible]

[illegible]

तत्कल्मषं तावत्तावतारमाह चक्रमिति निहतेजः निजप्रभावमेव चक्रं सुदर्शनं बिभर्ति चक्रवदप्रतिहतप्र
भावं बिभर्तीत्यर्थः तदेवाह मन्वंशपालकः मन्वन्तराणां लोकानां कृष्णरूपस्थितेन यः पालकोऽपि कामरूपी
योऽमन्वीतिर्विख्यातयज्ञराजसमुद्रं विधुन्ते ॥ धन्वन्तर्यवतारमाह लोकेऽवतीर्य धन्वन्तरिः मनसूतको
नाम्ना हरोगिणां स्वनाम्नैव रुजा रोगान् हन्ति स्वयमेव कीर्तिरितिकीर्तिशायोक्तिः अमृतं मरणाच्च नाम
पूर्वयम्मात्मा: अथ अथ समुद्रे पूर्वं देवैः प्रतिवद्धयज्ञभागं चावरुन्धे लभते अवापत् इमिति पाठं प्रथममेव

चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति दुष्टेषु राजसु दमं व्यदधा
त्स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥ धन्वन्तरिश्च भगवान्स्वयमेव कीर्तिर्नाम्ना नृणां
पुरुरुजां रुज आशु हन्ति यज्ञे च भागममृतायुरवावरुन्ध आयुष्यवेदमनुशास्त्यवतीर्य लोके ॥
क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु उद्धन्त्यसाववनिकण्टा
कमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥ २२ ॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वा
कुवंश अवतीर्य गुरोर्निदेशे तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकन्धर आर्तिमा

र्च्छत् । आयुर्वेदं वेदं चानुशास्ति प्रवर्तयति ॥ २२ ॥ परशुरामावतारमाह क्षत्रमिति क्षयाय विधिना दैवेनोप
भृतं मेवर्धितं मत्तमेव समर्पितमिति वा ब्राह्मणेभ्यो द्रुह्यतीति ब्रह्मध्रुक् उज्झितः पन्था वेदमार्गो येन ।
अतएव नरकार्तिं लिप्सतीति ॥ २२ ॥ रामावतारमाह त्रिभिः अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया
भरतादिरूपया सह कलानामीशः कलेशः गुरोर्निदेशे पितुराज्ञायां तिष्ठन्सीतालक्ष्मणाभ्यां सहितो वन

श्री
भाग
द्विती
२२

ह्रं मया संक्षेपेणोक्तं विस्तरेणा वक्तुं न कोपि समर्थ इत्याह विष्णोर्नु इति यः पार्थिवान्यपि यो विममे गणितवान् तस्य विष्णोः कोनु वि
ष्णोर्वीर्यगणनां कर्तुमर्हतीति कथंभूतस्य यो विष्णुः त्रिपृष्ठं सत्यलोकं चस्कंभ स्तंभितवान् किमिति च स्कंभयस्मात् त्रै
विक्रमेणास्खलता प्रतिघातशून्येन स्वरंहसा स्ववेगेन पादवेगेन त्रिसाम्यसदनं प्रधानं तस्मादारभ्य उरु कंपयानं
प्रयानं कंपेन यानं यस्मिंस्तिवा अत एवाणाच्चस्कंभ आविष्कृतिवान् सत्यलोकमभिव्याप्य सर्वं धृतवा
नित्यर्थः तथा च मंत्रः विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ... यः पा
र्थिवानि रजांसि ... यो विष्णुः त्रेधा विचक्रममाणः त्रिविक्रमं कुर्वन् उत्तरे लोके अस्कंभयत् अ

विष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि चस्कंभ यः स्वरंहसास्ख
लता त्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानम् ४० नान्तं विदाम्यहममी मुनयोग्रजास्ते मा
याबलस्य पुरुषस्य कुतोपरे ये गायन्गुणान्दशशताननआदिदेवः शेषोधुनापि समवस्यति ना
स्य पारम् ४१ येषां स एष भगवान्दययेदनन्तः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं ते दुस्तराम
तितरंति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ४२ ॥

वषच्चवान् कथंभूते समधस्थे सहस्रसमस्यमथाहेषाः तिष्ठंतीति सधाः तत्रस्थे देवसहवर्तमानः तात्पर्यं ४१
एतत्प्रपंचयतिनांतमिति पुरुषस्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि इत्यपातान्यान नानिया
स्य सोपि अस्य गुणान् गायं पारं न समवस्यति न प्राप्नोति ४२ यदि न कोपि वेत्ति तर्हि कथं मच्यवन त
त्रापर्यैवत्याह येषामिति दययेत् दयां कुर्यात् ते च यदि निष्कपटं आश्रितचरणा भवंति ते दुस्तरां दे
वमायां अतितरंति च कारान्मायावैभवं विदंति च श्रेयोति वा पादः प्रत्युत मेव तेषां मायोत्तरणमित्याह
नैषामिति श्वशृगालानां भक्ष्ये देहे बुद्धिः ४२ ॥

व्यासावतारमाह अनुयुगे मीलितामेऽनुचिताधीर्येषां स्तोकमल्पायुर्येषां स्वनिगमस्तत्कृतो वेदशाखिः व
तस्त्वहो दूरे पारो यस्य सति दुर्गमः स्वयमेव सत्यवत्यामाविर्भूतस्सन् स एव हरिः विटपशः शाखाभेदेन ३५
बुद्धावतारमाह देवद्विषां निगमवर्त्मनि स्थितानां निगमवर्त्मनि निष्ठितानां तद्बलेन च पूर्भिः पुरीभिः अदृश्या
तूर्भिर्गतिर्यासां ताभिर्मतिविमोहं योगिमतानामगोचरमाम्नायमतं प्रलोभं च अग्रयुक्तो वीकारयत्मान्नपाखण्डवेषं
विधाय तेन औपधर्म्यं पाखण्डधर्मं ग्राह्यं बहु भाषिष्यते इत्यर्थः ३४ कल्क्यवतारमाह यर्हि यदा

कालेन मीलितधियामवमृश्य नॄणां स्तोकायुषां स्वनिगमो बत दूरपारः आविर्हितस्त्वनुयुगं स हि
सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ३५ देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन
विहिताभिरदृश्यतूर्भिः लोकान्घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यं
३६ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाषण्डिनो द्विजजना वृषला नृदेवाः ३७ स्वाहा स्वधा वषडि
ति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान्युगान्ते ३७ सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्था
नेऽथ धर्ममखमन्वमरावनीशाः अन्ते त्वधर्महरमन्युवशासुराद्याः मायाविभूतय इमाः पुरुशक्तिभाजः

तां समालयेषु गृहेष्वपि ईश्वरीं कथा पाषण्डिनः म्लेच्छा राजानः तदा कल्किरूपेण कलेः शास्ता भविष्यति।
अत्र श्लोके नामदेवाद्यासुरादयो नृदेवाः मन्वन्तरावतारान्समुद्भूतानाविर्भावितुं पञ्चमस्कन्धे तिष्ठन्ति मो
नदाविनति क्षीरामालयकृताभाविन तत्रतत्र विभूतादि निर्दिश्य उद्दिष्टः इति स्पष्टम् ३७ सृष्ट्यादिकार्य
भेदेन मायागुणावतारान् विभूतीराह सर्गे इति स्थाने स्थितौ धर्मो विष्णुः धर्मश्च मखश्च मनवश्च अमरा
श्च अवनीशाश्च अन्ते संहारे अधर्मः हरः मन्युवशाः सर्पाः असुराः शक्तिधारिणो भगवतः मायाविभूतयः ३८ ॥

देवे इन्द्रे पर्जन्ये गिरिं गिरितनयिवुरिवर्षति अनघे अश्रमवति एककरे सलीलं यथा तथा महीध्रो
वर्धनं पर्वतं धारयिष्यति उच्छिलींध्रं छत्राकमिव सप्तवर्षो महीध्रमवयाय सप्तस ३१ निशि गौर्यां निशाकररश्मि
भिः गौर्यां धवलायां वने क्रीडन् कलानि मञ्जुलानि पदानि यस्मिन् तच्च तत् आयतं दीर्घं मूर्छितं आलापविशे
षयुक्तं गीतं तेन उद्दीपितः स्मररुग्यासां ताभ्यो गोपीनां हर्तुः धनदानुगस्य शिरो हरिष्यति ३२ ये च प्रलंबा
दयः ते सर्वे हरिणा हता भूत्वा तदीयनिलयं प्रदर्शनं प्रदर्शनाय यास्यंतीत्युत्तरेणान्वयः खरो

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून्कृपया रिरक्षुः धर्तोच्छिलीन्ध्रमिव सप्तदिना
नि सप्तवर्षो महीध्रमनघैककरे सलीलम् ३२ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः
कलपदायतमूर्छितेन उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ३३ ये
च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः अन्ये च शाल्वकपिबल्वलदंतवक्त्र
सप्तोक्षशंबरविदूरथरुक्मिमुख्याः ३४ ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्य
कुरुकैकयसृंजयाद्याः यास्यंत्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीय

धेनुकः दर्दुरः दर्दुरो बकः इभः कुवलयापीडः कपिः द्विविदः कुजो नरकः ३३ ये च मृधे आत्तचापाः समि
तौ संग्रामे शालन्ते श्लाघन्ते समितिशालिनः तत्र प्रलंबादिवरकपिलकृकिसप्रकाशावा चलभेशानिहत्य का
म्बोजादयश्च भीमार्जुनादिभिः पीवरः प्रच्छन्नेन यवनेन मुचुकुन्देन हरिणा तथा हलः बलः भीमः पार्थः इति
दयः व्याजाह्वया कपटनामानि यस्य तेन स्नातानां क्षेत्रे नदीमिता कालानिरयास्यतीति भावः एतच्च सर्वं
प्रतिकर्म दिव्यमिव तच्चाल्पकालमायामिति सर्वेषामवसंबंधः ३५ ॥

एतदेव प्रपंचयति लोकेनेत्यादिना बालेन एतेनाधाजीवहरणं। यतस्तेनानुभावगरूत्ता अन्तरेतेन मधे
अभेनोदि विस्मयेणाः अस्तुच येषाः इतरथा अनीशस्व तत्र समभवितव्यम् २२ विषतोयपीतान् विषमतोयस्यपीते
पानयेषामालान् गोपालानां स्वहस्तपादादिभिस्थावयिष्यतीति यस्मनायाक्रीडनजोकालियमुद्धारीय
ष्यतितद्रूह्येयतस्तदिदमन्यानि विषयत्वायश्रुतिविषवीर्यानाविलालाचचलजिह्वायस्य २३ दिव्यमलौकिकं इति
लोकात्तिड्वन्निपातेउद्भवेष्यनिष्पुचिः ग्रीष्मः तत्रसर्वपितिवनेशुष्कतृणपर्णः अतोदावाग्रेहतोः अवमितोनिश्चितो
अतकालोयस्यतत् सबालःसरामः अनपिगास्पड्जेयंवीर्यं यस्यसः तत्रनिशिनि पायानमिति कालियदमनया
यस्त्रजेनव्रजपशूनिषतोयपीतान्यालोक्यजीवयदनुग्रहदृष्ट्यावृष्ट्या तदूह्येयतिविषवीर्यविलोलजि
ह्वेमञ्चारयिष्यनुयेविहरनहृदिन्याम २४ लोकेनजीवहरणायइत्यलौकिकाया वैमानिकमस्यचपदापा
कलेपहना यदिगात्तांतरगतेनदिविस्मयेणावानुन्मूलनेनितत्पाजेनयोनभावम् २५ तत्कर्मदिव्यमि
वयत्निशिनिः पायानलदावाग्निनाप्तुचिवनेपरिदह्यमाने उन्नेष्यतिव्रजमतोवमितांतकालेनेत्रपिधायम
बलोनिपिगास्यवीर्यः २६ गृहीतानयत्पदपल्लवमनुष्यमातात्वेष्टतस्यनतत्तनदमुष्यमाति यज्ञ
भतोस्यवदनेभुवनानिगोपीसवीक्ष्यशंकितमना प्रतिबोधितासीत् २७ नन्दश्चमोक्ष्यतिभयादहत
णस्यपाशान्ने पालि लएपिहितान्यपहनुताच असुरात्तनिशिपायानमतिश्रमेणलोकंविकुंठम
अोपयनतीनेवपिपायपिहितेकामयितेतिमेजातदूत्यामितिमेयम् २८ उपवर्ण्यतेजेनेतिउपवर्णतत्वाय
नेपुल्लवदामस्वष्यमालायपोदायग्रहीतं अनुष्यमसातिवेधनमिमितेनभवतिलक्ष्येनकृत्यर्थः गोपीयशोदाम
वीत्ययसूप्रतिबोधितानिजे पुत्र्यजानिताप्रासीदितियत् तत्कर्मदिव्यमेवेति सर्वत्र पूर्वेणान्वयः २७
वरुणस्यपाशान्नंभयप्यनस्मान्मोचयिष्यति मयपनुनाबोमनानाष्माशाहत्तनिशिपायानमितिचवेकुंठप्राप्ति
साधनानुष्ठानाभावादर्शितं उपनेष्यतिप्रापयिष्यतिगोकुलवासिनं स्वस्यपादमयं ३१ ॥

श्री
भाग
टि०
२८

किंतद्भगवतः स्वरूपं यस्मिन्मनोधारणां विधाय समाधेरंतरायेतीत्यपेक्षायामाह शश्वदिति द्वाभ्यां यद्ब्रह्मेति विदुः ... तद्वै भग
वतः स्वरूपं किं तद्ब्रह्म तदाह अजस्रसुखं नित्यानंदं विशोकं चेति अजस्रसुखत्वे हेतुः शश्वत्सदा प्रशांतमतो नित्यसुखं स्वरूपं विशोक
त्वे हेतुः अभयं यतः समं भेदरहितं द्वितीयाद्वै भयं भवतीति श्रुतेः तत्कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसं न तु ज्ञानस्यापि
नीलपीताद्याकारेण वस्त्वादिकारणभेदेन भेदोऽस्त्यतः शुद्धं निर्मलं ननु दर्शितविषयकरणापरागरूपमलं स्यात्तत्राह स
दसतः परं विषयकरणमपास्तं तत्त्वत एव तद्रूपेणानवस्थानस्येति भावः ननु तथापि ज्ञानाश्रयसहभेदः स्यात् आत्मतत्त्वं आत्मनो ज्ञातृ
स्वरूपमेव न तु ततो भिन्नं ननु चैवं नोपनिषदं पुरुषं पृच्छामीति शब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह शब्दो न यत्रेति आरोपि
तानेकत्वादेव शब्दस्य व्यापारो न तत्र प्रसरतीत्यर्थः ननु भवतु नाम निरस्तभेदं ... नाम विशोकत्वं तस्य तु नानाकारकसाध्यक्रियं
फलत्वात्कथमजस्रसुखत्वं तस्येत्यत आह अत्र बहुकारकसाध्यः क्रियार्थः उत्पाद्याप्यविकार्यसंस्कार्यरूपं चतुर्विधं क्रियं

शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्य
भिमुखे च विलज्जमाना ४९ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं सध्र्यङ्नियम्य यतयो
यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिंद्रः ५१

फलं चनास्ति इंद्रियैर्नानाशाभिव्यक्तिं क्रियाभिरिव क्रियाभिरानंदांशाभिव्यक्तिर्यतो नोत्पत्त्यादिकमिति भावः ननूत्पत्त्याद्यभावे
पि मायामलापाकरणेन विकार्यत्वं स्याद्व्रीहीणामिवतुषापाकरणेन त्वाशंक्याह माया अभिमुखे अवस्थाने विलज्जमानेव यस्मा
त्परैति हरेनोपसरति ५० तस्मादेवंभूते भगवति यमितं मनः साक्षात्तर्थो नातोऽन्यत्किमपि कृत्यमस्तीत्याह सध्र्यङ्ङिति सध्र्यङ् स
हचरं मनः यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयो यत्नशीलाः को भेदः तन्निरासः अर्वाः तत्र हेतिं साधनं जह्युः त्यजेयुः अत्र
पर्यायात्तत्र्यादिर्यते यत्वार्थः उपयोगाभावेन साधनानादरे दृष्टांतः निपीयते अस्मिन्निति निपानं कूपः तस्य खनित्रं खनितं साधनं य
था स्वराट् स्वयमेव पर्जन्यरूपेण विराजमान इंद्रिनादेनास्त्रदितियद्वा स्वेनैव राजत इति स्वराट्
देविंद्रः स यथा इंद्रः स्वसुखः सनकमीकादशायां गृहीतनिपानखनित्रं जह्यातितद्वदित्यर्थः ५१

५८

…न्तर्यामित्वाभावेऽपि मायां यमितिज्ञानं तत्स्वरूपं यावज्जानातीत्याह वेदाहमिति त्रिभिः यूयमिति सनकादीनां नामोक्तं वक्तृत्वेन दैत्यवर्यः प्रह्लादः मनुः स्वायंभुवः तस्य पत्नी च तदात्मजाः पुत्राः कन्याश्च प्राचीनबर्हिषो विसर्गलोपः छान्दसः ४१ पातुं धनुः … रन्तिदेवः … पकपषपते महितो देव

वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः। पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिरृभुरङ्ग उत ध्रुवश्च ४२ इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः। मान्धात्रलर्कशतधन्वनुरन्तिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः ४३ सौभर्युतङ्कशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः। येऽन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ४४ ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः। यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ४५ ॥

व्रत इत्यर्थः ४२ उपेन्द्रदत्तः ऋषिः विभीषणादयः … ४४ किं बहुना तत्त्वतो न सर्वेऽपि विदन्तीत्याह ते वा इति अद्भुतः क्रमः पादन्यासः यस्य हरेः तत्परायणानां … शीलं येषां … भवति … अपि विदन्तीत्यर्थः … सर्वे … विदन्तीति किमु वक्तव्यं ४५ ॥

श्री
भा द्वि
टी २९

अष्टमे देहसंबंधमात्रेणप्रजीवयोः बहुन्यायविद्यादृष्टेन्नगुणाख्यानेनप्रसिद्धिनात नमेतद्विपुलीकृतविस्तृतं
तदेवविपुलीकरणंपृष्ठंतनिब्रह्मणानिविभिः अगुणस्यगुणानांतस्यापिदेवदर्शनेयस्मै १ निःसंगमनः श्रीकृ
ष्णेनिवेश्यपरिस्यक्ष्येतोदर्शितः सोपिश्रद्धयाशृण्वतोनान्यपथकत्याहशृण्वतइति ३ स्वप्रयत्नंविनाभगवा
न्स्वयमेवहृदिविशति ४ भावसरोरुहंहृत्कमलप्रविष्टः तन्नतहृदयगतंसर्वमलंधुनोति सलिलस्येति
दृष्टांतस्यामिश्रणादिनाकृष्णस्यजलस्थितिनदेवकेवलंशुध्यतिनतुनदीतटागादिगतेसचमलः कृष्णात्

राजोवाच ॐ ब्रह्मणाचोदितोब्रह्मन्गुणाख्यानेगुणस्यच यस्मैयस्मैयथाप्राहनारदोदेवदर्शनः १
एतद्वेदितुमिच्छामितत्त्वंवेदविदांवर हरेरद्भुतवीर्यस्यकथालोकसुमंगलाः कथयस्वमहाभागयथाह
मखिलात्मनि कृष्णेनिवेश्यनिसंगंमनस्त्यक्ष्येकलेवरं ३ शृण्वतःश्रद्धयानित्यंगृणतश्चस्वचेष्टितम् का
लेननातिदीर्घेणभगवान्विशतेहृदि ४ प्रविष्टःकर्णरंध्रेणस्वानांभावसरोरुहं धुनोतिशमलंकृष्णःसलिल
स्ययथाशरत् ५ धौतात्मापुरुषःकृष्णपादमूलंनमुंचति मुक्तसर्वपरिक्लेशःपांथःस्वशरणंयथा ६ ॥ ॥

अंतरेतिष्ठत्येवननसर्वथाविलीयते अतएवकिंचित्चलनेनपुनः प्रभवतिच एवंतपोदानादिप्रायश्चित्तेनसर्वथा
सर्वेषांसर्वपापंधुनोतिकिंतुसावशेषंतच्चकस्यचिदेवकिंचिदेवहृदिप्रविष्टमात्रस्तुश्रीकृष्णः सर्वेषांपापनिःशेषं
हरतीत्यनेनदृष्टांतेनोक्तं सलिलस्यमलंयथाशरदिति ५ ततःसकृतार्थीभवतीत्याहधौतात्मेति पांथः मुक्तासर्वेगोगेह
मादयः परिक्लेशायेनपांथः प्रवासादागतःस्वशरणं
गृहंयथानमुंचति तद्वत् ६ ॥

एवं तावदज्ञस्य संसारविपाके उक्तो भगवतः स्वरूपं तत्त्वाभासानां च प्राप्यं केवलत्वं वा न किंचिदस्तीत्युक्तं इदानीं तत्र शास्त्रस्यैव फलदातासर्वकर्मप्रवर्तकश्चेत्याह सएव श्रेयसां फलानां विभुः दाता पितृवद्धेतुः भावानां ब्राह्मणादीनां स्वभावेः शमदमादिभिर्विपाकेणो विहितस्य कृतः शुभस्य कर्मणो यत्प्रवर्तकास्तस्मिंहि यद्वा भावानां महदादीनां स्वभावे परिणामेन विहितस्य सतः कार्यस्य सिद्धिः सएव सर्गादीनां दाता तत्पथे न युक्तकर्मकर्तृभूतस्यकर्षतः स्वर्गादिफलं स्यान्नेत्याह स्वारंभकधातूनां भूतानां विगमे वियोगे मति अनुवि शीर्यमाणेपि देहे तत्र स्थे व्योमेव यः तेन सहैव विपर्ययेति यतः अजोसौ महत्सजातः तस्य प्रकृत्यस्य जीवस्य

सश्रेयसामपि विभुर्भगवान्यतोस्य भावस्वभावविहितस्य सतः प्रसिद्धिः देहे स्वधातुविगमेनुवि
शीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेजः ४८ सोयं तेभिहितस्तात भगवान्विश्वभावनः समा
सेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ४९ इदं भागवतं नाम यन्मे भगवतोदितं संग्रहोयं विभूती
नां त्वमेतद्विपुलीकुरु ५० यथा हरौ भगवति नृणां भक्तिर्भविष्यति सर्वात्मन्यखिलाधारे इति
संकल्प्य वर्णय ५१ मायां वर्णयतोमुष्य ईश्वरस्यानुमोदतः शृण्वतः श्रद्धया नित्यं माययात्मा
न मुह्यति ५२ ३ इति श्रीभागवते द्वितीयस्कंधे सप्तमो[illegible]ध्यायः ॥७॥

श्रेयसां प्रभृतीत्यर्थः ४८ अध्यायत्रयस्यार्थमुपसंहरति सोयं तेभिहितः समासेन संक्षेपेणाभिहितः तमेवाह सत्सत्कार्यं कारणं च हरेरन्यन्न भवति नन्वहं सत्त्वाति रिक्तं तस्य विकार एवेति स्यात् नत्वन्यस्मा त्कारणभूतो हरिः कार्यं तु व्यतिरिक्तमित्यर्थः ४९ संग्रहश्च विभूतीनां संग्रहरूपमिदं ५० यथा हरौ भगवति नृणां भक्तिर्भविष्यति एवं संकल्प्य संचिन्त्य तथा च कृष्णलीलाप्रधानेन सश्रीभागवतं वर्णय नतु भक्तिसाध्य नतु केवलं तत्त्वमित्यर्थः ५१ ननु लीलामायां श्रद्धया कीर्तयितुमयोग्यं नेत्यत आह मायामिति ५२ ।श्री।

श्री
भा टि
टी
२

इदानीं मन्वन्तरानुबद्धानर्थान्पृच्छति यावानित्यादिना कल्पो महान्विकल्पो वांतरः भूतादिशब्दो यस्मा
त्तद्यस्य वाचक इति वा मतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवतादेः आयुषः प्रमाणप्रकारः १२
१२ विशेषसूक्ष्मोत्तितिकालस्यानुगतिर्गतिप्रवृत्तिः कर्मगतयः कर्मप्राप्यानि स्थानानि यादृशीः यादृशाः
१३ गुणानां महदादीनां परिणामं देवतादिरूपं अभीप्सतां देहेन मनुष्यादिरूपमिच्छतां गुणिनां जीवानां मध्ये य

यावान्कल्पो विकल्पो वा यथा कालोऽनुमीयते भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः १२ काल
स्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम १३ यस्मिन्कर्म
समावायो यथा येनोपगृह्यते गुणानां गुणिनां चैव परिणाममभीप्सताम् १४ भूपातालक
कुब्व्योमग्रहनक्षत्रभूभृतां सरित्समुद्रद्वीपानां संभवश्चैतदोकसां १५ प्रमाणमण्डकोशस्य
बाह्याभ्यन्तरभेदतः महतां चानुचरितं वर्णाश्रमविनिश्चयः १६ अवतारानुचरितं यदाश्च
र्यतमं हरेः युगानि युगमानं च धर्मो यश्च युगे युगे १७ नृणां साधारणो धर्मः सविशेषश्च या
दृशः श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् १८ ॥

स्मिन्परिणामे कर्मणां गुणप्रधानानां समवायः समुदायः केन कर्मसमुदायेन कश्चित्केन कोपिका
रीदेवादिभावं प्राप्नोतीत्यर्थः १४ भूरादीनां संभवः एतानि त्रैलोक्यस्थितगृहाणि येषां प्राणिनां तेषां च
संभवः यच्चेति सर्वत्रानुषंगः वर्णानामाश्रमाणां च विनिश्चयः तत्तत्स्वभावनिर्धारः १६ युगे युगे प्र
तियुगं यो धर्मः यच्च हरेरवतारानुचरितं १७ सविशेषः वर्णाश्रमनिबंधनः श्रेणीनां तत्तद्व्यवसायोपजी
विनां व्यवहारनियमलक्षणो धर्मः राजर्षीणां प्रजापालनादिकः रिणां कृच्छ्रेषु आपत्सु जीवताम् ॥ १८ ॥

तदेवं प्रबोधोन्मुखो प्राविष्ट त्वमेवं स्वमपान्तर्यामीभवति अथान्तमतः पातवो भूतानि तत्त्वं तं पश्यन्नयं लोकि
कस्यात्मन् पातमिदं स्थासमतुति यदेतत्किंचिद्द्यानिर्मितं हेतुनावाकमीदिना भवेत्तायथावशानते श्र
त कथयति तिविशेषः १ यश्चासौ त्रीण्यामोधितमुत्पदे स्थावास्योऽत्र अतत्समस्य को विशेषः इत्याशयेनद
र्शयति आसीदिति सार्धेन लोकानामसंख्यानेयत्ता तदेव लक्ष्यते इत्यमपत्तनत्त्वमयमस्यादासमीत अमा
वी प्रस्तुत यत्नाय तत्रापरिमितेनवयवैः अर्थलोकिकः प्रकृतियावाल्पतमत्वेकावयवयुक्तः तावासौ
मेसयावान अवयववानुस्तबप्रोक्तः अतः को विशेषः तमेति ८ अवमपंचवर्णेषु वाच्यः अपाह अजोबला

यदधातमतो ब्रह्मलोके स्थापं भास्यपातुभिः यदेतद्याहेतनाबा भवेतास्ननत्ते यथा १ आसीय
इत्यातस्मिल्लोकमेस्यानल्लतां यावानयं वैप्रकृतः इयत्तावयवैः प्रपञ्चः ८ तावानमाविति
प्रोक्तं संख्यावयववानिव अतः स्फुतानिभूतानि भूतात्मायदनुग्रहात् ९ इहगोयेनतद्रूपं
नाभिपद्मसमुद्भवः सर्वापि यत्र प्रकृतौ विश्वमिन्द्रवाप्यय १० नन्नाममायामायया
शीतमर्वशुम्नाशय प्रकृत्यावयवैर्लोकाः सपालाः परिकल्पिताः ११ लोके सम्यग्व्यवयवा

भूतानामव्यक्तस्युपाधीनां भ्रात्मानि येतामसप्तपापिनात् येन नायस्योनानयं कृतं तानमप्रद्रूपं दृष्टवाह।
प्रवान पतत्वत्तस्यापि स्थूरीपामस्कटस्मस्यापिविलात्मनः स्फूर्य स्फुरणा सि स्पष्टो हमीतेयवाभिवो
दितः इत्यादिनानामतद्येत अयं तस्फुरणं स्पष्टमाविष्यति ५ प्रस्तावमाह सर्वापीति यत्र यतेयमद्रूप
पावातिष्ठते विश्वरूपमिन्द्रस्याप्ययस्मात् पद्मादिप्रस्थाने तन्नेना हेतुदाहतेमितिसर्वोत्ते क्रियया
सेबंधः ९ प्रस्तावमाह प्रकृत्यस्यावयवैः परिकल्पिता यस्य हावयवैः लोकाः कल्पयतेत्यादिलो
के प्रसमसंख्यावयवावयवाः इतिपातालमेतत्स्माहिपादस्तलमित्यादिना च वसंभवात् स्फुटं तवत्तावयम

[illegible] ॥

श्री
भाग
टि
२१

उपामंत्रितः पृष्टः सं सभायां परीक्षितः सतः २८ ब्रह्मकल्पे ब्रह्मणे पूर्वकल्पे भगवता प्रोक्तं नैव प्रश्नानामनन्तरदानं
मनुपक्रान्तवानित्यर्थः २९ पाण्डूनामृषभः श्रेष्ठः आनुपूर्व्येणेति प्रश्नानुक्रमेणैव विवक्षितः न प्रश्नक्रमः ३० इति श्री
भावार्थदीपिकायां द्वितीयस्कन्धेऽष्टमोऽध्यायः ८ ॥ राजप्रश्नानन्तरं तदन्यज्ञानं हरिणोदितम् । कथयामास नवमे
शुको भागवतं पुनः ॥ तत्र नारायणस्कन्ध यद्धानमनन्तमित्यनेन जीवस्य कथं देहसंबन्धः इति तत्रोत्तरमाह आत्मनो
देमायां नान्तरेणानुभवरूपस्यात्मनः अर्थेन देहादिना संबन्धः अञ्जसा न घटते अतो हेतुः परं

नेमे पुनः पप्रच्छेति ... पिबतोऽच्युतपीयूषमन्यत्र कुपिताद्द्विजात् २७ सूत उवाच स
उपामन्त्रितो राज्ञा कथायामिति सत्पतेः ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि २८ प्राह भागवतं नाम
पुराणं ब्रह्मसंमितम् ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते २९ यद्यत्परीक्षिदृषभः पाण्डूनामनुपृच्छ
ति आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ३० इति श्री भागवते द्वितीयस्कन्धेऽष्टमोऽध्यायः ८ श्री
शुकः आत्ममायामृते राजन्परस्यानुभवात्मनः न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा १ बहुरूप
इवाभाति मायया बहुरूपया रममाणो गुणेष्वस्या ममाहमिति मन्यते २ यर्हि वाव महिम्नि स्वे परस्मि
न्कालमाययोः रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ३ ॥
स्येति स्वप्नद्रष्टुर्यथा स्वप्नदेहसंबन्धान्तरं तेन ... मायैवेत्याह । बहुरूपो बालयुवादि रूपो देवम
नरादिरूपश्च आभाति गुणेषु देहादिषु अत एव भक्तियोगेन तत्त्विरामे मतिमोहो तत्त्यत इत्याह यर्हीति यर्हि
वाव तु स्वे महिम्नि यदा रमेत तदेवाह कालमाययोः प्रकृतिप्रकृत्योः परस्मिन् तदा उभयं अहं मम
मेति चात्यक्त्वा उदास्ते पूर्णो स्वरूपेणावतिष्ठते तदुक्तं यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोऽपि मनु
तेऽनर्थं तत्कृतं चाभिपद्यते अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो विद्वांश्चक्रे सात्व
तसंहितामिति ३ ॥

31

सर्वेषां तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्या लक्षणं तत्कार्यहेतुत्वेन लक्षणमित्यर्थः पुरुषाराधनस्य विधिः दे
वपूजाप्रकारः अष्टांगयोगविधिः २९ योगीश्वराणामैश्वर्यमणिमादिना अर्चिरादिगतिः लिंगस्य शरीरस्य
भंगः प्रलयोपि वेदादयः उपवेदाश्चायुर्वेदादयः धर्मा धर्मशास्त्राणि येषां इतिहासपुराणयोश्च गतिः ३० संप्ल
वोऽवान्तरप्रलयः यद्वा सम्यक् प्लवनं संप्लवः विक्रमः स्थितिः प्रतिसंक्रमः महाप्रलयः इष्टं वैदिकं कर्म पूर्तं स्मा
र्तं वापीकूपतडागादि देवतायतनानि च अन्नप्रदानमारामः एवमित्यभिप्रायेणेतरच्च काम्यानामग्निहोत्रादी

तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च २९ योगीश्वरै
श्वर्यगतिर्लिंगभंगस्तु योगिनाम् वेदोपवेदधर्माणामितिहासपुराणयोः ३० संप्लवः सर्वभूता
नां विक्रमः प्रतिसंक्रमः इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ३१ यच्चानुशायिनां सर्गः पाषंड
स्य च संभवः आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः ३२ यथात्मतंत्रो भगवान्विक्रीडत्यात्ममा
यया विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ३३ सर्वमेतच्च भगवन्पृच्छतो मेऽनुपूर्वशः तत्त्व
तोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ३४ अत्र प्रमाणं हि भवान्परमेष्ठी यथात्मभूः परे चानुतिष्ठन्ति पूर्वे

नां विधिः अविरोधप्रकारः ३१ अनुशायिनां लीनोपाधीनां जीवानां आत्मनो जीवस्य व्यवस्थानं बंधमोक्षादिभिः
स्वरूपेणावस्थानं ३२ उदास्ते प्रलये महाप्रलयादसृष्टेः ३३ ३४ प्रमाणं सम्यक् ज्ञाता यतस्त्वं ब्रह्मणो नारदद्वारा
क्रमेण संप्रदायास्थितिः सामान्यायनाह परे चानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतमितिवद्विदः
परोक्षेति ३५ पूर्वेषामपूर्वजैः यत्कृतं तदनुपपरं तिष्ठन्ति अनुकूलेति अपि च यस्य पूर्वेषां वदो का अन्यस्य त
न्मे लाघवात्मनानवनगपानक्लिष्टकोपादयांशिकलस्य जातः अवगामनाहर्तीति ३६ न परायन्ति नापगच्छन्ति न वा

एवं निशम्य तद्वचो वक्तृदिदृक्षया ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनचित्प्र
त्यक्षेण नियुक्त इव तच्चात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः १ ततश्च सहस्रं विलानालोकानां तापने
प्रकाशके तपस्यतप्यत कृतवान् तपतां तपस्विनां वचो मोघोऽथ अमोघं दर्शनं यस्य जित अनिल आत्मा मनश्चये
न विजितानि उभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन तपतां तपः चरतां मध्ये तपीयान् अतिशयेन तपस्वी
तस्मै स्वलोकं वैकुण्ठाख्यं परं श्रेष्ठं न यत्परं यतः परमन्यन्नास्ति तमेव लोकमनुवर्णयति प

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः स्वधिष्ण्यमास्थाय विमृश्य तद्धितं त
पस्युपादिष्ट इवादधे मनः १ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः २ तस्मै स्वलोकं भगवान्सभाजितः
संदर्शयामास परं न यत्परम् व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ३ प्रवर्तते
यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरा
र्चिताः ४ श्यामावदाताः शतपत्रलोचनाः पीतांगवस्त्राः सुरुचः सुपेशसः सर्वे चतुर्बाहव उन्मिष
न्मणिप्रवेकनिष्काभरणाः सुवर्चसः ५

विभिः व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिः यद्वा स्वस्य दर्शनमस्ति येषामात्मविद्भिः इत्यर्थः ४ तामेवाभि
प्रसत्त्वं च न प्रवर्तते किं तु शुद्धमेव सत्त्वं कालविक्रमो नाशः अपरे रागलोभादयो न सन्तीति किमुत वक्तव्यं अ
नुव्रताः पार्षदाः ४ श्यामाश्च ते अवदाताश्च उपमनेत्राः पीताम्बराः सुरुचः अतिकमनीयाः सुपेशसः कोमला
ः उन्मिषन्त इव प्रभावन्तो मणिप्रवेकाः मणिश्रेष्ठा येषु तानि निष्काणि पदकानि आभरणानि येषां ते सुवर्च

आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तत्त्वज्ञानार्थं तद्वच एव कीर्तयति यदाह इत्यादिना भजने भगवान् ब्रह्मणे आह
किं कुर्वन् ऋतं सत्यं चित्तघनं रूपं दर्शयन् दर्शने हेतुः अव्यलीकेन व्रतेन तपसा आदृतः सेवितः सन् अ-
यं भावः जीवस्याविद्यया मिथ्यात्वदेहसंबन्धः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव
इति महान् विशेषः अव्यलीकव्रतेन नात्मोपलब्धिरिति भागवतभजनादेव तत्त्वज्ञानमिति प्रपञ्चयिष्यन् ब्रह्म-
णोऽपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुमितिहासमाह स इत्यादिना यथोक्तः भक्तिरहस्योपदेशः

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतं ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ४ स आदिदे-
वो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत तां नाध्यगच्छद्दृशमत्र सम्मतां प्रपञ्चनिर्माणवि-
धिर्यया भवेत् ५ स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणोद्द्विर्गदितं वचो विभुः स्पर्शेषु यत्षो-
डशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ६॥

स्वधिष्ण्यमास्थाय अधिष्ठाय तस्याधिष्ठानात्मकपद्मस्य पूर्वं जले निमग्नः पराहृत्य स्वधिष्ण्ये स्थितवानित्य-
र्थः एतत्कथं स्यादित्यालोचितवान् तां दृशं प्रज्ञां नाम न अधिगतवान् विषये सम्मतामव्यभिचारिणीं विधि-
प्रकारः सृष्टिं चिन्तयन् कदाचिदेकदा अम्भसि जले उपाशृणोत् उपसमीपे श्रुतवान् तेष्व-
न्येषु स्पर्शेषु कादयो मावसानाः स्पर्शाः तेषु षोडशस्तकारः एकविंशः पकारः वचनमेतन्निर्दिशन्स्तौ-
माह हे नृप निष्किञ्चनानां त्यक्तसर्वधनानां धनं यद्विदुः अनेन तपो धनमिति प्रशंसितम् तद्धि द्विर्गदितमतपतपेति
लोकस्य प्रसिद्धमेकवचनं तस्यावीक्ष्यमाणस्य वक्तुरदर्शनात् द्विरुक्तमित्यर्थः एवं श्रीवदीकास्य ६॥

श्री
भा. टि.
३३

सेमसैः स्वाभाविकैरैश्वर्यादिभिः स्वतन्त्रयोगिवृन्दस्य भुवैनगोन्तेके साधारणोभिन्नार्थः एवं सत्यपि स्व एव धामन्व
स्वरूपेण एव रममाणा अन्त एव ब्रह्मा तत्सदर्शनेनत्राह्लादः तेन परिप्लुतत्वान्नमाताः ततः करुणया स्मरह ध्यातीरोमा
विलानि नर्येस्य प्रेमभरेणमाणिलोचनेषु यस्य १७ विभ्रमस्य लापाः महेस्य नयथा तत्ता नमार्गेणा १८ तत्र तामोभ
गवानुवभाषे प्रजासर्गकार्यं निजशासनाहेणाम्वतियां गाहेणा प्रजाविसर्गं सम्यगुपस्थितमितिवान्वयः ईषत्स्मि
तेन रोचिरदीप्तिः ध्रुभाययस्याः तत्र गिरामिस्रजन्यहेतुना १९ चिरं संभृतेनात्पसा अहं सम्यक् तोषितः इत्याह:

युक्तं भोगैः सेवितस्वच्छचाधूर्वैः स्वएव धामनू रममाणामीब्रह्मा तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः
प्रेमभरास्नुलोचनः १७ ततः नामपादाब्जमस्याविभ्रमस्य यत्पारहंसनयथाधिगम्यते १८ तं प्रीमाणं
सम्यगुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणाम् बभाषे ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतम
नाः करस्पृशन् १९ श्रीभगवानुवाच त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया चिरं भृतेन तपसा
इत्याह: कृतयोगिनाम् २० वरं वरय मंद्रं ते वरेशं माभिवाञ्छितम् ब्रह्मन्श्रेयःपरिश्रामः पुंसाम
दर्शनावधिः २१ मनीषितानुभावोयं मम लोकावलोकनं यदुपश्रुत्य रहसि चकर्थ परमं तपः २२॥

ता ब्रवीति सम या वयः २० माकृतिमो श्रेयसो फलानां परिश्रामः सोधनप्रयासः मम दर्शनमवधिर्यस्य तत्तथा
तो धिकं तनपुनः फलं मास्तीत्यर्थः एतच्चमत्कृपयैव त्वया प्राप्तमित्याह २१ मनीषितमिच्छातम्भमिदं ददात्वं
इतियामम ते स्थानता अनुभावोयं कोसीतमाह ममलोकस्यावलोकनं यत् न चेदं ममैव तपोबलेन प्राप्त
मिति स्वतन्त्र्योगासम्य स्वतन्त्रत्वेऽपि मत्कृतत्वादित्याह रहसि तपते पतियद्वचउक्त्यापरमंतपच

33

३३

प्रवालादिवद्दीर्घैर्वर्णैर्येषां तेषां परिस्फुरंति कुंडलानि मौलयो मालाश्च संति येषां पार्षदानत्र वर्णयन्पुनर पि लोकमनुवर्णयति भ्राजिष्णुभिर्दीदीप्यमानाभिः ।२ प्रमदोत्तमानां दिवः कांतयः ताभिः विद्योतमा नः सविद्युत् हिर्वर्तमानाः सविद्युतः ताभिरभ्रावलिभिः तत्र विष्णुलोके वस्त्रियः ।३ अभ्रपंक्तयश्च विमा नानि नभवश्च लोकः श्रीस्सेयत रूपिणीमूर्तिमती मानैः पूजोविभूतिभिर्नानाविभवैः ।२ प्रेंखश्रिता दोलनं संश्रि

प्रवालवैडूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः भ्राजिष्णुभिर्यैः परितो विराजते लस द्विमानावलिभिर्महात्मनाम् ।२ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः श्री र्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ।३ प्रेंखं श्रिता या कुसुमाकरानुगैर्विगी यमाना प्रियकर्म गायती ददर्श तत्राखिललोकपालपतिं श्रियः पतिं यत पतिं जगत्पतिं ।४ सुनंदन न्दप्रबलार्हणादिभिः स्वपार्षदाग्र्यैः परिसेवितं विभुम् भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहा सारुणलोचनाननम् ।५ अथ तद्दर्शनसमये मया स्थितं परं च तत्तच्छोभाभिः किरीटिनं कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ।६ ॥

ताकुसुमाकरो वसंतः तस्यानुगाभ्रमराः तैर्विविधं गीयमानात्वयं तत्प्रियस्य हरेः कर्म गायंती भवति ।४ य एवंभूतो लोकः तत्र तस्मिन् भृत्यानां प्रसादे अभिमुखं हिं दृगोत्सवः दृष्टिर्हर्षकरी प्रसन्नहासेनारुणलोच ने च आननं यस्य ।५ वक्षसि लक्षितं श्रिया लक्षितं मलंकृतं तदर्थः अथ हरिणा यदवतीर्य सिंहासने चल स्व प्रकृतिपुरुषमहदहंकाराः रूपाः षोडश विकाराः दशेंद्रियाः महाभूतान्यव्यो पंचतन्मात्ररूपाः शक्तयः

नामदेवाराम ॥१६॥

अवघृणे च मदो भवितास्मन्तं चिकाले माभूदिति प्रार्थयते यावदिति भो ईश ते त्वया लौकिकसखा सख्युः सखे
वाहं कृतः करग्रहणादिना सम्मानितः सन् प्रजासृष्टिरूपे तव परिकर्मणि सेवायां स्थितः अविक्ल
वः अव्याकुल एव यावज्जनं विभजामि उत्तममध्यमादिभेदेन सृजामि तावन्मे समुन्नद्धः अहमेवाजः स्वत
न्त्र इति मानिनो मम समुन्नद्धः उत्कटो मदो मा भूत् यद्वा मदो मा भूत् समुन्नद्धमानस्तस्मान्न स्यात् उद्रिक्तो न भवेदि
त्यर्थः २९ ज्ञानं शास्त्रोक्तं विज्ञानं तदनुभवः रहस्यं भक्तिः तदङ्गं साधनमिति वक्ष्यामीति निर्देशात् तस्याङ्गं साधनं ३०
यावान्स्वरूपतः यथाभावो यादृक्सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य तदेवमस्य उपदिश

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भोजनं अविक्लवस्ते परिकर्मणि स्थितो
मा मे समुन्नद्धमदोऽज मानिनः २९ श्रीभगवानुवाच ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् स
रहस्यं तदङ्गं च गृहाण गदितं मया ३० यावानहं यथाभावो यद्रूपगुणकर्मकः तथैव तत्त्वविज्ञान
मस्तु ते मदनुग्रहात् ३१ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् पश्चादहं यदेतच्च योऽवशिष्येत सो
ऽस्म्यहम् ३२

तु यावानित्यस्यार्थं स्फुटयति ३१ अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः नान्यत्किंचित् यत्सत् स्थूल
मसत्सूक्ष्मं तयोः परं कारणं प्रधानं तदप्यन्तर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसम्
एव केवलं न त्वन्यत्कारणं पश्चात्सृष्टेरनन्तरमपि अहमेवास्मि यदेतद्विश्वं तदहमेवाहमस्मि प्र
लये योऽवशिष्येत सोऽप्यहमेवानेनं मायाया अपि सृष्टत्वादन्यमाणोपयोगित्वात् स्वमायां निरूप
यति ३२ ज्ञानायतनमादौ ह्नीयता व्यतिरेकी मिथुनं भवति यथात्ममायायोगेनेत्येतेन ३३

तदपि त्वं प्रतिमयैवादिष्टमनुपदिष्टं कदाचन तदा सृष्ट्यारंभे त्वयि कर्मणि कार्यार्थे विमोहिते सति किं तपो ना
ममभेव भ्रान्तिरित्याह तपो मे हृदयमन्तरंगा शक्तिः आत्मा स्वरूपं यस्य तेनात्मना यन्तपसि तिष्ठतः श्रुतेः २३ ग्रसामि
संहरामि बिभर्मि पालयामि वीर्यं शक्तिः २४ अध्यक्षोऽपि सन् गुहायां बुद्धौ अवस्थितः यद्यपि वेद तथा
प्रतिरुद्धेनेणान्वयः २५ नाथमानस्य याचमानस्य तत्प्रार्थमानस्य मे तु निवानाथय नाथय प्रयच्छ नाथितं याचि
तं

प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते तपो मे हृदयं साक्षादात्माहं तपसोऽनघ २३ सृजामि तप
सैवेदं ग्रसामि तपसा पुनः बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः २४ ब्रह्मोवाच भगवन्सर्वभू
तानामध्यक्षोऽवस्थितो गुहाम् वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् २५ तथापि नाथमानस्य
नाथ नाथय नाथितम् परावरे यथा रूपे जानीयां ते त्वरूपिणः २६ यथात्ममायायोगेन नाना
शक्त्युपबृंहितम् विलुम्पन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना २७ क्रीडस्यमोघसंकल्प ऊ
र्णनाभिर्यथोर्णुते तथा तद्विषयां धेहि मनीषां मयि माधव २८ भगवच्छिक्षितमहं क
रवाणि ह्यतन्द्रितः नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् २९ ॥

ते नाथ नाथय पूरय याञ्चां पतापि मे शीघ्रं नाथितमेवाह परं सूक्ष्मं अवरं स्थूलं च ते रूपे यथा जानीयां २६ यथा
त्मा पुनः क्रीडसि तथा तद्विषयां मनीषां मह्यं त्वं देहीत्युत्तरेणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुम्पन् संहर
न् विविधं सृजन् बिभ्रत् पालयन् आत्मना स्वयमेवात्मानं ब्रह्मादिरूपं गृह्णन् क्रीडसि २७ क्रीडसि ऊर्णु
ते तन्तुभिरात्मानमाच्छादयति तथा किं स्पृष्टा हि मन एवं तत्सृष्टाले प्रार्थयसे २८ भगवता त्वया शिक्षितमनुशि
ष्टमतन्द्रितः अनलसः सन् करोमीति हि किमनेन तत तत्रानेन तत आह यस्मादेवं तत्तावदनुग्रहात् प्रजा

श्री
भा द्वि
टी
३५

तदनंतरं पूर्वोक्तप्रसंगमनुसरन्नेवाह· प्रजापत्यत्वं प्रजापतिरिति त्रिभिः प्रजानां भद्रमन्विच्छन्नपि स्वस्वा
र्थकाम्यया स्वप्रयोजनेच्छया तथा यमनियमान् अहिंसासत्यादयो यमाः शौचसंतोषतपःप्रादयो नियमाः तानन्वतिष्ठ
त् ४० रिक्थादानां पुत्राणां मध्ये प्रियतमः तं पितरं सेवमानः शीलादिना परितोषयामास किमिच्छन् विष्णोर्मा
यां विविदिषन् ४१ निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः· मामो ४२ भगवता चतुःश्लोक्या संक्षेपेणोक्तं विस्तरेणाह दश
लक्षणं निरूपणीयाः सर्गाद्यर्था विद्यन्ते यस्मिंस्तत् तत्संप्रदायस्तु भागवतस्यायाप्योक्त इत्याशयेनाह नारद इति ४ ४

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ४० तं नारदः प्रि
यतमो रिक्थादानामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४१ मायां विविदिषन् विष्णोर्मा
येशस्य महामुनिः महाभागवतो राजन् पितरं पर्यतोषयत् ४२ तुष्टं निशाम्य पितरं लोकानां प्रपि
तामहम् देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ४३ तस्मा इदं भागवतं पुराणं दशलक्षणम्
प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ४४ नारदः प्राह मुनये सरस्वत्यास्तटे नृप ध्यायते ब्र
ह्म परमं व्यासायामिततेजसे ४५ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्या
स्ये प्रश्नानन्यांश्च कृत्स्नशः ४६ इति श्रीभागवते द्वितीयस्कंधे नवमोऽध्यायः ॥ ९ ॥

35

भागवताख्यानेनैव तत्तत्प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति ४५ पुरुषावयवैर्लोकाः सपालाः सर्वक
ल्पिताः इत्यादिना वैराजात्पुरुषादिदं विश्वं कथमासीदिति यत् अहं त्वया पृष्टः तद्यथावदुपाख्यास्यामि इति वि
तिशेषः ४६ इति श्रीभावार्थदीपिकायां द्वितीयस्कंधे नवमोऽध्यायः ९ ततो भागवताख्याने दशमेऽवद
च्छुकः स्वयं राजप्रश्नोत्तरं वक्तुमारेभे बादरायणिः दशलक्षणपुराणं प्राहेषूक्तानि तानि दशलक्षणानि वि

ऋतेऽर्थं विनापि वास्तवमर्थं यत्प्रतीयेत किंचात्मनि सन्मात्रेऽप्यधिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तदात्मनः मम मा-
यां विद्यात् यथा आभासो द्विचन्द्रादिरिव अर्थं विना प्रतीतौ दृष्टान्तः यथा तमः इति सतोऽप्रतीतौ भूतेषु यथाभासस्तथा तमो
स्यादित्यर्थः असतः प्रतीतौ दृष्टान्तो द्विचन्द्रः वस्तुतस्तमिस्राख्यः सतः प्रतीतौ दृष्टान्तः तमो राहुर्यथा ग्रहाणां मध्ये सन्न-
पि न प्रतीयते एवं सृष्ट्युपायात् ३४ यथा महान्ति भूतानि भौतिकेषु अनुप्रविष्टान्यन्तः प्रविष्टानि तत्र उपलभ्यमान-
त्वात् अप्रविष्टानि च प्रागेव कारणात्मना तत्र विद्यमानत्वात् तथा तेषु भूतभौतिकेषु अहं प्रविष्टः अहं न चैवं भूता-
न्यनुप्रविष्टः सत्तारूपेण ३५ आत्मतत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचारणीयं तदेवाह अन्वयः कार्ये

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथा तमः ३४ यथा महान्ति
भूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ३५ एतावदेव जिज्ञास्यं तत्त्वजिज्ञा-
सुनात्मनः अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३६ एतन्मतं समातिष्ठ परमेण समाधिना भ-
वान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ३७ ॥ ३ ॥ एवं सम्प्रदिश्याजो जनानां परमेष्ठिनः
पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ३८ अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः सर्व

षु कारणत्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्साक्षित्वेनान्वयः
व्यतिरेकश्च समाध्यादौ निजस्वरूपेणावस्थानात् कार्येभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु कार्येषु साक्षि-
त्वात् एवमन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा तदेवात्मेति ३६ ये चतुःश्लोकी श्रीभागवतार्थसूत्रात्मभू-
ताः अधुना यत्प्रार्थितं तेन हे मानः प्रजासर्गमिति तत्र सफलीकरोति ३७ एतन्मतं सम्यगनुष्ठ समाधिना चित्तै-
काग्र्यात् कल्पेषु विकल्पाः विविधाः सृष्टयः तेषु विमोहः कर्तृत्वाभिनिवेशो न यास्यतीति ३७ एवं सम्प्रदि-
श्य आदिश्य अजनानां परमेष्ठिनः परमे स्थाने स्थितस्य ब्रह्मणः आत्मनः तद्रूपं न्यरुणत् अन्तर्हितवान् ३८

श्री भा द्वि टी ३९

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनुशयनात् शक्तिभिः स्वोपाधिभिः सह हरणयत्नेन लयः निरोधः अन्यथारूपमविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ६ आभासः सृष्टिः निरोधो लयश्च यतो भवति अध्यवसीयते प्रकाश्यते च स आश्रयः ब्रह्म परमात्मेति प्रसिद्ध आश्रय उच्यते ७ आश्रयस्य स्वरूपस्य पृथग्बोधनाय तदनुभवेन स्पष्टं दर्शयितुं अध्यात्मादिविभागमाह ७ योयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकः चक्षुराद्यधिष्ठाता सूर्यादिः तयोरुभयोर्यो विच्छेदो येन भवति स आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो देहः पुरुषः इति पुरुषस्य जीवस्योपाधिः सर्वोऽपि पुरुषो नाम समस्य स्यादित्यर्थः ८ एवमेकतराभावे त्रितयो

> निरोधोस्यानुशयनमात्मनः सह शक्तिभिः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः आभासश्च
> निरोधश्च यतश्चाध्यवसीयते स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ७ योध्यात्मिकोयं पुरुषः सो
> सावेवाधिदैविकः यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ८ एकमेकतराभावे यदा नोपलभा
> महे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ९ ॥

सत्योऽन्यसापेक्षसिद्धेरनात्मत्वं दर्शयति तथाहि द्रष्टृत्वं विना तत्स्फूर्तीनां क्रमेणैकस्याप्यसिद्धिरिति नाधिष्ठान चक्षुर्गोलकं विना करणप्रवृत्तेः नेत्रादिकस्य सूर्यादिः नच तं विना करणं प्रवर्तते नच तं विना द्रष्टृत्वमित्येकतराभावे एकैकं नोपलभामहे तत्र तत्त्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः तेषामधिष्ठानानां अधिष्ठानं स्वयं स्वाश्रयोऽनन्याश्रयः स चासावन्येषामाश्रयश्चेति तथा च भगवानवदत् इत्युपमार्केण चक्षुर्ग्रामं परमात्मनि संस्थितः स्वतः स्व आत्मा स्वेषामपि आश्रयः स्वयमनुभूत्या विलसितमिति एतेन वैश्वमिच्छायां तेषामाश्रयत्वं अनन्तं सत एव पुरुषावयवे लोकाः सपालाः सर्वे कल्पिताः लोकैः सह स्वावयवाः सपाले इत्येतेनोक्ता विराट्पुरुषरूपेण ९ ॥

३८

दशलक्षणान्याह अत्रेति अत्राशरीरस्य विसर्गः पुरुषस्वीकारसर्गः पुरुषाद्ब्रह्मादीनामुत्पत्तिर्विसर्गः २ तेषामाधारा
वधिस्थितिः स्थानम् ३ स्थितानामभिरक्षिः पोषणम् ४ शुष्मानामाचारऊतिः ५ तत्रापि सदाचारो मन्वन्तरम् ६ तत्रापि वि
ष्णुभक्तकथा ईशानुकथा ७ विष्णुभक्तानां प्रपञ्चाभावो निरोधः ८ निष्प्रपञ्चानां स्वरूपलाभो मुक्तिः ९ मुक्ता
नामालम्बनं रूपं पोवस्थानवस्थानम् आश्रयः १० मन्वन्तराणि ईशानुकथाश्चेति द्वन्द्वः सर्गादयोऽत्र ये दश
श्चालक्ष्यन्ते यत्र तेनैतदाख्यानं तन्त्रान्तरेषु व्यवस्थानि न त्वेवमर्थभेदात् शास्त्रभेदः स्यात् तत्राह ॥ द
शमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वतो नार्थं नवानां लक्षणं स्वरूपं पृथक् एव प्राधान्यात् तदावेदयन्नर्थः नन्वेवं
न प्रतीयते अतआह श्रुतेन श्रुत्यैव श्रुत्यादिस्थानेषु जनास्तुत्या हुणायति अर्थेन तात्पर्यवृत्त्या तत्तदाख्यानेषु

श्रीशुक उवाच अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः १
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा २ भूतमा
त्रेन्द्रियधियां जन्म सर्ग उदाहृतः ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ३ स्थितिर्वैकुण्ठवि
जयः पोषणं तदनुग्रहः मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ४ अवतारानुचरितं हरेश्चास्यानुव
र्तिनाम् पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ५ ॥

सर्गादीनां क्रमेण लक्षणमाह ३ भूतानि आकाशादीनि मात्राणि च शब्दादीनि इन्द्रियाणि च धीशब्देन महदहंकारौ
गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् कर्तृः भूतादीनां यद्विराड्रूपेण स्वरूपतश्च जन्म सर्गः
पुरुषो वैराजः तत्कृतः पौरुषः चराचरसर्गो विसर्गः ३ वैकुण्ठस्य श्रीभगवतो विजयः उत्कर्षः सृष्टानां
तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम् भक्तेषु तस्यानुग्रहः पोषणम् तदनुगृहीतानां मन्वन्तराणि सतां
धर्मः कर्मणां वासनाः ऊतयः वंशानुगमनात् ऊयन्ते कर्मभिः संतन्यन्ते इति ऊतयः यद्वा ऊहात् स्थानम्
यान्वयार्थं नातिदृढं रूपं ऊतीकर्मभिर्वर्धते सांख्यमते इति वा ऊतय इत्यर्थः ४ हरेरवतारानुचरितम् अस्या

श्री
भा॰ द्वि
टी
३१

महत्त्वं दर्शयति प्राणान् इन्द्रियाणि यं प्राणन्तं चेष्टां कुर्वन्तमनुप्राणन्ति चेष्टां कुर्वन्ति अपानन्तं चेष्टां त्यजन्तमनु अपानन्ति चेष्टां त्यजन्ति राजानमनु भृत्या इव।१६ क्षिपता चालयता निमित्तेन क्षुत्तृडादिके विराट्जीवाभेदेनोपासनायोक्ते आजायते स्म ततो जक्षतः भक्षयितुमिच्छतः इत्यर्थः प्राक् प्रथमं निरभिद्यत विभक्तमभवत्।१७ तालु अधिष्ठानं जिह्वा इन्द्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या एवं सर्वत्र अधिष्ठानमिन्द्रियं देवता विषयश्चेति चतुष्टयमनुक्रमन्तव्यम्।१८ विवक्षोर्वक्तुमिच्छोः मुखतः एव वह्निर्देवता वागिन्द्रियं व्याहृतं भाषणं तयोरिति इन्द्रियदेवताधीनत्वं क

37

अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु अपानन्तमपानन्ति नरदेवमिवानुगाः।१६ प्राणेनाक्षिपता क्षुत्तृडन्तरा जायते प्रभोः पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत।१७ मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते।१८ विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः जले चैतस्य सुचिरं निरोधः समजायत।१९ नासिके निरभिद्येतां दोधूयति नभस्वति तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः।२० यदात्मनि निरालोकमात्मानं च दिदृक्षतः निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः।२१ बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः।२२॥

र्मणा दर्शयति।१९ नभस्वति प्राणवायौ दोधूयति धूयमानेन प्रचलन्तं सति तत्र नासिकायां वायुर्देवता गन्धवहतीति तथानेन गन्धो विषयो दर्शितः घ्राणमिन्द्रियं जिघृक्षतः गन्धं ग्रहीतुमिच्छतः।२० निरालोकं प्रकाशशून्यमात्मानं दिदृक्षोः निर्मोहिकमिति वदेकवद्भावः तदात्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतः अक्षिणी स्थानं ज्योतिरादित्यो देवता चक्षुरिन्द्रियं ततो गुणस्य रूपस्य ग्रहः ग्रहणेन रूपं विषयो दर्शितः।२१ ऋषिभिर्वेदैर्बोधमानस्यात्मनः प्रबोधं ग्रहीतुमिच्छतः ततो गुणग्रहः शब्दग्रहणं।२२॥

उक्तमेवाध्यात्मादिविभागं प्रपञ्चयन् यदुक्ताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्य इति प्रस्तातं तदुत्पत्ति प्रकारमाह पुरुष इति पुरुषो वैराजः अण्डं विनिर्भिद्य एष यदासौ निस्थितः इत्यर्थः अयनं स्थानमन्विच्छन् विमृशन् यतः शुचिः स्वयमतः शुचीः शुद्धाः आपः गर्भोदकसंज्ञास्ता अस्राक्षीत् अस्य वासेन नारायणो नाम स्पष्टयति तावित्ति तेनास्य वामेन यद्यस्मात् पुरुषान्नराः तस्माज्जज्ञिवांसः ताः नाराः आपो यतः अयनं यस्येति नारायणः तदुक्तं आपो नारा इति प्रोक्ता आ

पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥१०॥ तास्ववात्सीत्स्वसृ-
ष्टासु सहस्रपरिवत्सरान् तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥११॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥१२॥ एको नानात्वमन्विच्छन्योगतल्पात्समुत्थितः वीर्यं हिरण्मयं देवो माय-
या व्यसृजत्त्रिधा ॥१३॥ अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥१४॥ अ-
न्तःशरीर आकाशात्पुरुषस्य विचेष्टत ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥१५॥

यो वै नरस्तनवः अयनं तस्य ताः एवं तेन नारायणः स्मृत इति तस्य प्रभावमाह ॥ द्रव्यं पञ्चमहाभूतानि उपादानं कर्मादी-नि निमित्तानि जीवो भोक्ता यस्यानुग्रहात् सन्ति कार्यक्षमा भवन्तीत्यर्थः ॥१२॥ योग एव तल्पं शय्या तस्माद्वीर्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलं तस्यैव प्रपञ्चः ॥१३॥ अधीत्यादिना अन्तः शरीरे य आकाशः तस्मात् क्रियाशक्त्या तत्र विविधं चेष्टमानस्य मतः ओज इन्द्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः ततः शक्त्यात्मकात् सू-त्मा रूपात्प्राणः सूत्राख्यः महानसुः असुः प्राणः सर्वेषाम् ॥१५॥ ॥

श्री
भा॰द्वि॰
टी॰
३८

वृभिरितिवेष्टारि त्युभयमेवरीतितिवितिदर्शयन्नमिकाविलं यत्नादीनां दर्शयति प्रजापतेर्मानेवोरतिः अमृतं स्वर्गादि तदर्थिनः
शिश्नोऽधिष्ठानं उपस्थः इंद्रियं प्रजापतिस्त्वामोदितितेय तदुभयाश्रयं कामानां तं संभोगानां सर्वेषां प्रियं तत्त्वं २६ धात्त
मलं भुक्तान्नादीनां असारांशं त्यक्तुमेवक्तः ततः गुदपायुमित्रोत्सर्गा अधिष्ठानेंद्रियदेवताविषयाः २७ पुर्या देहात् पुरो देहान्तरा
णि आसीसृप्सोः सर्वेंद्रियाणां तत्समिच्छा निरभिद्यतोत्यनुषंगः अपानतः अपरात्तः ततः पृथक् मरणं नाभ्यादीन्यधिष्ठानादी
नि नाभ्यां हि प्राणापानयोः संधिविच्छेदः प्राणमृत्युरिति प्रसिद्धं २८ अन्नपानानामादित्सोः संग्रहीतुमिच्छोः कुक्ष्यन्त्र

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयं २६ उत्सिसृक्षोर्धात
मलं निरभिद्यत वै गुदं ततः पायुस्ततो मित्रं उत्सर्ग उभयाश्रयः २७ आसिसृप्सोः पुरः पुर्या नाभिद्वारमपान
तः तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् २८ आदित्सोरन्नपानानामासन्कुक्ष्यन्त्रनाड्यः नद्यः
समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये २९ निदिध्यासोरात्ममायां हृदयं निरभिद्यत ततो मनस्ततश्चन्द्रः सं
कल्पः काम एव च ३०

णां च नाड्यश्चासन् तत्र कुक्षिरधिष्ठानं अन्त्राणि अन्नसंग्रहे करणमिंद्रियस्थानीयं नाड्यस्तु पानसंग्रहे तयोर्नद्यः समु
द्रौ देवते तुष्टिः समुद्रा अद्भ्यो देवते तुष्टिश्च पुष्टिश्च रसपरिणामतः स्यात् तदाश्रये तदुभयनिमि
त्ते अन्नसंग्रहेच्छोः कुक्ष्यन्त्रसमुद्रतुष्टयः पानसंग्रहेच्छोः ऊर्ध्वनाडीनदीपुष्टयः इति विवेकः २९ निदिध्यासोरात्मनि
तदीयां चिंतयितुमिच्छोः कामोऽभिलाषः हृदयं मनः चन्द्रसंकल्पाः अधिष्ठानादयः तदेवमधिदैवादिभेदं विभज्य
ज्ञानदर्शनार्थं तान्येव धातुसमूहस्वरूपमाह त्वगिति द्वाभ्याम् ३०

38

तत्त्वं चर्मकाठिन्ये चर्मस्त्वं त्वचस्त्वं त्वच आदत्वं भीषड्रत्वं चशीततां चेत्यर्थः यद्यप्यत्र त्वमिंद्रियपवनस्थापित
स्पर्शजिह्वत्वाभावात्कोमलमित्युक्तं त्वग्बुद्धिरिति पाठे यत्रादेशः क्रोदमः वस्त्रेणपतत्वमन् जिह्वत्वाः त्वग्निर्भिन्नात
गिंद्रियाधिष्ठानं चर्मजानमित्यर्थः तस्यां रोममाग्निरिंद्रियमहीरुह त्वद्देवताजाताः वस्त्रेनिरूत्तेनातालिनिलत्त्वन
हत्व योनीनारयन्तिगिंद्रियविषयत्वमितिपोषणीकाः तत्रवविस्त्रतबहिस्त्ववातेन्द्रहताः आहत्यास्थिताः कंतोरि
विषाकयन्त्रतः त्वचालत्त्राश्रुणः स्पृशीयत्र त्र्ययमर्थः तविन्द्रियमववहिः कह्नतिसहितस्पर्शगृहत्वानले
मशह्नेनोत्वेततत्रमहीरुहणां देवतं त्रतबहि त्वस्पर्शगृहत्व न तदेवतत्व शाह्नेनो त्वेततत्रवातीदेवतानत्याह

वस्त्रेणोमह्वकाठिन्यलत्त्वग्वीलशीततां जिह्वत्वतत्त्वकनिर्भिन्नात्तस्यां रोममहीरुहाः २३ तत्रचांतर्बहि
र्वायुः त्वचालत्त्वगुणोवृतः २४ हस्तौरुरुहतुस्तस्य नानाकर्मचिकीर्षया तयोस्तुबलवानिंद्र आदानमु
भयाश्रयः २५ गतिंजिगीषतःपादौरुरुहातेभिकामिकां पद्भ्यांयज्ञःस्वयंविष्णुकर्मभिःक्रियतेनृभिः

तृतीयेवत्यपति तत्त्वमस्यविनिर्भिन्नाविविस्पर्शस्पशोमोषधीः अंशुनलोमभिः कंड्यीं सोप्रतिपद्यतेत्युतिनिर्भिन्नान्यस्य मर्म
णिलोकपालोनिलोविशत् प्राणेनांशेनसंयेनासोप्रतिपद्यते इतितत्र मर्माणीतिमर्मोपलक्षितानवणित्यर्थः प्राण
नांशेनेति प्राणवायुत्त्यांशेनत्वगिंद्रियेणेत्यर्थः वहन्नवस्त्रानेकपवीशानिर्दिष्टः त्वग्रुरुपि यत्तमवोलामानिलोम
भ्योधिवनस्पतन्कृपति २३ विवरणे सर्वत्रैवलिखितं २५ रुरुहतुनिर्भिन्नौवलिमिंद्रियंद्रोदेवतातदुभयाश्रयमाद
नं कर्म २५ अभिकामिकामभीष्टां विहितादुमयर्थः पद्भ्यांमहयतोविष्णुरेवस्वयंतदधिष्ठानरूपेणस्थितःक
र्मभिरितिरायाणा कर्मंशक्तिरिंद्रियस्कंदहव्यक्रियते इतिप्राप्तं
यज्ञास्वदेवाविषयत्वंकुम २५ ॥ ॥ ॥

श्री
मा हि
ह्री
३९

स्थभावेनैतत्ः प्राक्तनेन ग्रन्थेन स भगवान् ब्रह्मरूपधृक् सन् वाच्यवाचकतया वाचकतया नामानि वाच्यतया रूपाणि
क्रियाश्च पृथक् सृजतीत्यर्थः मायया सकर्मा सव्यापारः सन्नवक्तः अकर्मकः पञ्चमपञ्चयति प्रजापतिनितिमात्रैस्त्रिभिः २१
द्वितीयोत्तानोपनेः स्त्यनयः ततः प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तत्तत्कर्माणि चैतेषामिति पृथक्तत्तत्स्वोत्तरा
भेदेन २८ गिरीनित्यस्यानेतत्संस्थपेति मेवोधनं किन्नरादयः कूष्माण्डादयः पिशाचादयश्चेति ४० द्विविधाः स्थावरजंगमरू
पेणोक्तविधाः जरायुजाण्डजस्वेदजोद्भिज्जरूपेण सलक्ष्मन्भौमिद्यौकामिपयोतानपन्नैः तिमर्वेणानान्वयः यश्चराजा

सवाच्यवाचकतया भगवान् ब्रह्मरूपधृक् नामरूपक्रियाः पृथक् सकर्माकर्मकाः परः २१ प्रजापतीन्मनू
न्देवानृषीन्पितृगणान्पृथक् सिद्धचारणगन्धर्वान्विद्याधरमहोरगान् २८ किन्नरान्मर्त्यनागांश्च यक्षां
किंपुरुषोरगान् मातरः पिशाचांश्च प्रेतभूतविनायकान् २९ कूष्माण्डोन्मादवेतालान्यातुधानान्ग्र
हानपि सर्पान्मृगान्पशून्वृक्षान्निर्मीलनप्रसर्पणान् ४० द्विविधांस्त्रिविधांश्चैतान्जलस्थलनभौकसः उ
ष्णालौकणालामिश्राः कर्मणां गतयस्त्रिमाः ४१ सत्त्वं रजस्तम इति त्रिभिः सृष्टनायकाः तत्रापि केवलागता
भिद्यते गतयस्त्रिधाः ४२ यद्यैकैकतयोन्याभ्योत्स्वभावयुपह्न्यते ४३ ॥

सृष्टेयावत्यः कर्मणां गतयो याः सर्वा हि जनमनसेति तस्याभिप्रसंगादेनैनैवोत्तरमा उष्णालाउत्तमाअउष्णालुनीचाः ।
मिश्राः तिपदान्तरेभिश्रामध्यमाः कर्मणां त्रयाणां मिश्राणां गतयः फलानि ४१ सत्त्वादिभेदेन कर्मगतिवैचित्र्यं प्रपञ्चयति
सत्त्वमिति सत्त्वादयः त्रिधा गतयः सत्त्वादिषा हाउच्चीणामपलनत्वार्थः ४२ अन्याभ्योगुणाभ्यो स्वभावोगुणउपह्न
न्यते अनुविधान्ते ब्रह्मरूपेणास्वष्टत्वसत्त्वानामतत्स्वरूपेण फलवत्त्वमाह ४३ ॥

39

त्वक् स्थूलं चर्म तदुपरिस्थितं सूक्ष्मं त्वगादयो भूम्यन्ताः इत्येवं क्रमो विनिर्दिष्टाः सप्त ये धातवस्ते भूम्यप्तेजोमयाः तेषां च
पञ्चमेनिकालेऽपि वाय्वाकाशयोराहारादिरूपेणास्तवर्धकत्वाभावादेवमुक्तम् ३२ गुणात्मकानि गुणोऽभ्यशब्दादिषु आत्मनः
येषां विषयाभिव्यक्तिस्वभावानीत्यर्थः गुणाः शब्दादयः तामसाहंकारः भूतादिरहंकारः ततः प्रभवो येषां भवन्तीति तथाहंकार
विकल्पितशोभनस्वभावाः न तु वस्तुता तथात्वमर्थः अत्र हेतुः यतो मनएव सर्वविकाराणामात्मा स्वरूपं बुद्धिरपि तथा विज्ञा-
र्थविज्ञानरूपिणी न तु परमार्थग्राहिणीति वैराग्यार्थमुक्तम् अनेनैव च बुद्धिमनसोः स्वरूपमुक्तम् उपसंहरति एतदिति ३

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः ३२ गुणात्मकानीन्द्रिया-
णि भूतादिप्रभवा गुणाः मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ३३ एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया मह्या- है
दिभिश्चावरणैरष्टभिर्बहिरावृतम् ३४ अतः परं सूक्ष्मतमम् अव्यक्तं निर्विशेषणम् अनादिमध्यनिधनं नित्यं वाङ्-
मनसः परम् ३५ अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः
३६

३३ गुणात्मकप्रकृत्या सह अष्टभिः स्थूलमुक्त्वा सूक्ष्मं समष्टिलिङ्गशरीरमाह ३४ अतः परमस्य स्थूलस्य कारणभूतं सूक्ष्म-
मतीन्द्रियं यतस्त्वव्यक्तं तत्कुतः यतो निर्विशेषणं तत्कुतः अनादिमध्यनिधने उत्पत्तिस्थितिलयशून्यं नित्यं सदेकरू-
पं अप्रपत्यादि स्वल्पमित्यर्थः अतएव वाङ्मनसयोरतिदूरं स्फुटमेकाम् तस्मात्परमनपाम्नार्थं भगवत्यारोपितं रूपद्वयमप
वदति अमुनीति ३५ न गृह्णन्ति नाङ्गीकुर्वन्ति वस्तुतः यतो मायासृष्टे यद्यपि रूपगुणकर्मैकत्वन्तु भगवतो ब्रह्मा-
णं प्रति तत्स्वरूपं च यदि तत्स्वादिरूपाणि तत्कर्माणि चाह स इति ३६

श्री
भा॰ द्वि
टी॰
५॰

परिमाणे स्थूले सूक्ष्मे च कल्पस्य लक्षणे यानेवं रूपमिति तद्विग्रहः स्वरूपं कल्पमनेन तद्दिनरूपे भाणे च य
थावद्विस्तरेण पुरस्तात् तृतीयस्कंधे व्याख्यास्यामि तत्र च पाद्मं कल्पमथाद्वितीकास्पेन व्याख्यायमाणं
शृणु यदर्थं सूक्ष्मादि निरूपणं तदेव मातात् आत्मकामः कथांतरं पृच्छति ॥५॥ यदाहेति भवः संबंधयो

परिमाणं च कालस्य कल्पलक्षणविग्रहं यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्प
मथो शृणु ॥४६॥ शौ को॰ उ॰ यदाह नो भगवान् सूत क्षत्ता भागवतोत्तमः चचार ती
र्थानि भुवस्त्यक्त्वा बंधून् सुदुस्त्यजान् ॥४७॥ कुत्र कौषारवेस्तस्य संवादोऽध्यात्म
संश्रितः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥४८॥ ॥ ॥

40

तीर्थानि यद्वा भुवः क्षेत्राणि चेति ॥४७॥ कौषारवेर्मैत्रेयस्य तस्य तत्र क्व अध्यात्मतत्त्वाने श्रितः संवादः ॥
४८॥ ॐ नमः कमलदलविपुलनयनाभिरामाय ॥ ॐ वसुदेवसुतं देवं कंसचाणूरमर्दनम् देवकी
परमानंदं कृष्णं वंदे जगद्गुरुम् ॥ ॥

स एव भगवांल्लियेगाद्यवतारैर्विश्वस्यापि पालयन्धर्मरूपेण पुष्णाति भोगैः संवर्धयति रुद्ररूपेण संहर्ते
त्यमाह ततः स्वात्मनः सकाशाद्यदिदं सृष्टं तत्संनियच्छति संहरति कालेनाद्यपवादेन दशमस्य श्लोकस्य ५५
इत्थंभावनासृष्टत्वादिरूपेण तस्मात्सर्पं तस्मादात्मन आकाशः संभूतः सोऽकामयत बहु स्यां प्रजायेयेत्या
दिश्रुत्याकथितः स्वयं तत्परं कैवल्येनैवंरूपेणावद्रष्टुं नार्हतीति ५६ तत्किमतः अस्य विश्वस्य जन्मादिकर्म
णि परमेश्वरस्य इत्थंभावः कर्तृत्वं नास्ति ख्यापितात्मयोगेन प्रतिपाद्यते किन्त्वनेनाविधीयते अतएव

स एवेदं जगद्धर्ता भगवान्धर्मरूपधृक् । पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ॥ ५४ ॥ ततः
कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः । संनियच्छति कालेन घनानीकमिवानिलः ॥ ५५ ॥ इत्थंभा
वेन कथितो भगवान्भगवत्तमः । नेत्थंभावेन हि परं द्रष्टुमर्हति सूरयः ॥ ५६ ॥ नास्य कर्मणि जन्मादौ
परस्यानुविधीयते । कर्तृत्वप्रतिषेधार्थं मायया रोपितं हि तत् ॥ ५७ ॥ अयं तु ब्रह्मणः कल्पः
सविकल्प उदाहृतः । विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥ ५८ ॥

त्यते किमर्थं कर्तृत्वप्रतिषेधार्थं हि यतो मायया तदारोपितं प्रकाशितं तथा च श्रुतिः निष्कलं निष्क्रि
यं शान्तं निरवद्यं निरञ्जनम् इन्द्रो मायाभिः पुरुरूप ईयते इत्याद्या ५७ उक्तमर्थमुपसंहरति अ
यं त्विति ब्रह्मणः संबन्धी कल्पो महाकल्पः विकल्पोऽवान्तरः तत्सहित उदाहृतः उदाहरणत्वे
न संक्षेपत उक्तः कथंभूतः यत्र महाकल्पे प्राकृता महदादिसर्गाः अवान्तरकल्पे च वैकृताः सर्गा
वराहादिसर्गास्तयोर्विधिः प्रकारः अन्यमहाकल्पादिभिः साधारणः ५८
वक्ष्यमाणविस्तारं प्रति जानीतेत्यर्थः ॥ ॥॥

श्री
भा॰ टि॰
टी॰
५१

पुनरागामी वान्तत्र च निमित्तेन ब्रूहि ॥ ५० ॥ राज्ञा पृष्ट इत्यस्य समर्थः । य — यत्पृष्टं तदिदमेव राजा परीक्षित्पृष्टवान्
शुकोऽपि विस्तरेण यं संवादं पुरा क्षत्त्रा एवं राज्ञा कृताः प्रश्नाः तदनुसारेण सर्वं पुराणं मुनिरवोचत् तदेवा
हं तेऽभिधास्यामि तच्छृणुतेति ॥ ५१ ॥ इति श्रीभागवते भावार्थदीपिकायां द्वितीयस्कंधे दशमोऽध्याय

त्यक्त्वा स्वान्दायादान्सौम्या
विदुरप्यपि … चापितम् वै
धृत्वागानिमि … त्तं च तत्पैवा
गतवानुनः … सूत उवाच
राज्ञा परीक्षि … ता पृष्टो यद
वोचन्महामु … निः ॥ तद्वोऽभि
धास्ये शृणुतः … राज्ञः प्रश्नानु
सारतः ५१ ॥ इ … ति श्रीभागवते
द्वितीयस्कंधे दशमोऽध्यायः १० स स्तो

यः समाप्तो द्वितीयस्कंधेऽतिश्रीवं श्रीमद्भागवतस्य … द्वितीय … प्रोक्तं नैव … ग्रहमी
श्वरं यन्मत्र … त्रिविश्व … नर्ति … मतं तमेव … सर्वलितमम द्वितीयस्कंधमेवमपि यद्ववभा
र्थदीपिका श्रीधरीयतामिय … यतः स्यात्तत्वदीपिका इतनामि … यामतः नमतां समस्माहमम् मयाहि
स्वीयबोधाय कृतमेतत्त्रमवतः ॥

५१

द्वितीयस्कंधपत्र ५२

42